which we meet with at the end of the seventh act, are no doubt very excellent in themselves; but they, being too long and having no bearing on the matter in hand, are to be reckoned as a fault. If our poet had the keen perception of a dramatist, he would have easily seen that there was a greater advantage in actually representing at least some of the incidents which he introduces in the form of narration in the fifth act. But as a poet he ranks very high. Not to speak of the minor beauties of style, such as alliterations and others, he seems to be a perfect master of the language that he uses. He can find no difficulty in wielding his words in any way he likes. He employs soft and melodious phrases when he has to describe the sentiment of love or pathos, and long compounds and harsh-sounding consonants will not be wanting when his theme is the extreme anger of Parasurâma or the wonderful valour of Râvaṇa; and yet on no occasion is he known to have sacrificed the perspicuity of his expressions in the slightest degree. His power of depicting the sentiment of love is vividly manifested in the second act. But the sentiment of heroism, exhibited in the fourth and the seventh acts, makes a stronger impression on our minds. It appears that a desire to imitate a scene in the third act of the Uttararâmacharita of Bhavabhûti must have led our poet to imagine the magical scene of the sixth act of the present play. A very high degree of excellence has been reached by him in this place in portraying the sentiment of pathos. His similes and metaphors are generally new, and, when old, at least in a new form. His ideas are original without being obscure; and his puns are numerous without being tedious. He is equal to his predecessors, Râjas'ekhara and Murâri in the power of imagination, but even superior to them in simplicity and melody. And if poets are to be classified by the same principle by which their poems are, every reader will unhesitatingly agree with us in regarding him to be a poet of the second class.

A few stray remarks only remain to be made. In I.10 a play, by name *Harachâpâropaṇa*, is alluded to. And here, we are quite aware, it is more likely that the poet has framed an imaginary name than that he has referred to an actually existing play. But Monier Williams in his dictionary notices the word and says that it is the name of a play. If his information is derived from any other source than the present one, it is, we think, a point that deserves consi-

deration. Prasannarâghava, the title of the play, has a very near resemblance with and therefore seems to be borrowed from Murâri's play, called Anarghyarâghava. Udâttarâghava is a play of a comparatively later date. It is a remarkable feature of the Prasannarâghava that the Prakrit language is very scantily used in it. Last of all, it should be noticed that the poet seems to have divided his play into two parts, the first part comprising the first four acts and the second the next three. The chief clue to this inference of ours is the occurrence of the verse, यशःपूरं दूरं &c., possessing the value of a *Bharatavâkya* in all respects, at the end of the fourth act, and the repetition of the same about the end of the seventh.

A list of works quoted or consulted with their Abbreviations where used.

Anargharâghava. ...... (A. R.)
Bhâminîvilâsa. ...... (B. V.)
Bharatachampu. ...... (B. C.)
Bhartri's Shatakas...... (Bh. N. denoting Niti and V. Vairâgya.)
Chandrâloka. ......(Chandr.)
Das'arûpa. ...... (D- R.)
Dowson. ......
Gîtagovinda. ...... (Gît.)
Indian Antiquary ......
Kâvyaprakâsha. ...... (K. P.)
Kirtikaumudi ...... (Kir. K.)

Kumârasambhava.......(Ku.)
Mahâbhârata. ......(Mb.)
Mahâviracharita. ......(M C.)
Mâlatimâdhava. ......(Mâl.)
Meghaduta. ......(Me.)
Mukundânanda ......
Nâgânanda. ...... (Nag.)
Raghuvansa. ...... (R.)
Râmâyaṇa. ......
Ratnâvali. ......(Ratn.)
Shakuntala. ......(S.)
Uttararâmacharita. ...... (U.)
Venisamhâra. ...... (Ve.)
Vikramorvasiyam. ...... (V.)

॥ श्रीः ॥

प्रसन्नराघवम् ।

प्रथमोऽङ्कः ।

1 चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः
श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः ।
भालेष्वब्जभुवो लिखन्ति युगपद्ये पुण्यवर्णावलीः
कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः ॥ १ ॥

अपि च ।

आकल्पं मुरजिन्मुखेन्दुबहलोन्मीलन्मरुन्माधुरी-
धीरोदात्तमनोहरः सुखयतु त्वां पाञ्चजन्यध्वनिः ।
लीलालङ्घितमेघनादविभवो यः कुम्भकर्णव्यथा-
दायी दानवदन्तिनां दशमुखं दिक्चक्रमाक्रामति ॥ २ ॥

अन्यच्च ।

नाभीपद्मवसच्चतुर्मुखमुखोद्गीतस्तवाकर्णन-
प्रोन्मीलत्कमनीयलोचनकलाखेलन्मुखेन्दुद्युतिः ।
सक्रोधं मधुकैटभौ सकरुणस्नेहं सुतामम्बुधेः
साश्वासप्रणयं सरोजवसतिं पश्यन्हरिः पातु वः ॥ ३ ॥

---

1. A. बहुल & D. G. मधुर for बहल. A. गुणोत्तरः for मनोहरः. A. B. निर्जित for लङ्घित. C. E. F. निनदः for विभवः. A. B. कारी for दायी; & आस्कन्दति. A. अपि च. A. B. D. गीर्ण for गीत. A. °कैटभे. B. सोच्छ्वास & D. G. सोत्प्रास.

नान्द्यन्ते ।

2 सूत्रधारः । परितो विलोक्य सहर्षम् । अये कथममी निजवदनशारदारविन्दनर्तितगिरिनन्दिनीनयनखञ्जनस्य निखिलमुनिजनहृदयरञ्जनस्य विकटजटापटलोत्सङ्गरङ्गताण्डवितगङ्गातरङ्गनिकरस्य मन्दाकिनीचन्दनललाटिकायमानमुकुटोपनीतनूतनसुधाकरस्य त्रिभुवननलिननिर्माणनिर्मलबिसाङ्कुरस्य भगवतः शङ्करस्य यात्रायां परिमिलिता एव पारिषद्राः । तदेतानुपगम्य निजकलावलोकनप्रसादाय तावदभ्यर्थयामि । विमृश्य । अथवा किमभ्यर्थनया ।

आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम् ।
गर्भस्थं केतकीपुष्पमामोदेनैव षट्पदाः ॥ ४ ॥

विलोक्य सहर्षम् । नूनमेतदभिसंधानादेव सामाजिकसमाजादितोऽभिवर्तते सखा मे रङ्गतरङ्गः ।

3 प्रविश्य नटः । भाव इदं मन्मुखेन भवन्तमुदीरयन्ति सामाजिकाः । यत्किल अये भरताधिराज । इत्यर्धोक्ते ।

4 सूत्र० । कर्णौ पिधाय । अहह असमञ्जसमसमञ्जसम् । भवतु । कार्यं तावदाकर्णयामि ।

---

2. D. om. अये. A. B. om. निखिल. B. नन्दन for रञ्जन. F. कलाप & G. पाटल for पटल. C. G. om. रङ्ग. A. B. नलिनी. G. adds श्री before शङ्करस्य. F. G. मीलिता. B. D. G. विलोकन. A. B. अभ्यर्थये. A. om. अथवा. C. E. G. add यतः before the verse. F. पत्र for पुष्प. A. B. C. D. E. इव for एव. A. समासा°. A. B. add अयम् after इतः & om. सखा मे.

3. D. om. इदम्. C. D. E. F G. add एव after मुखेन. A. om. यत्किल. D. om. अये & F. आर्य. A. om. इत्यर्धोक्ते. B. °उक्तौ.

4. A. D. om. one असमञ्जसम्.

5 नटः । भाव अधुना मयैव भवत्सकाशादाकर्णनीयं किमिदमसमञ्जसमिति ।

6 सूत्र० । नन्विदमेव यत्किल नन्दति ज्यायसि कनीयसि राजपदमुपन्यस्यते । अहं हि भरतमात्रक एव । मम पुनरग्रजन्मा गुणारामनामा राजपदभाजनम् ।

7 नटः । भाव कीदृग्गुणस्ते गुणारामः ।

8 सूत्र० । ननु नाम्नैव दत्तमुत्तरम् ।

9 नटः । कथं नाम्नैव गुणावगमः ।

10 सूत्र० । अथ किम् ।

गुणग्रामाविसंवादि नामापि हि महात्मनाम् ।
यथा सुवर्णश्रीखण्डरत्नाकरसुधाकराः ॥ ९ ॥

अपि च किमिदं गुणारामेऽपि नाम्नैव गुणावगम इत्युच्यते । यः खलु रतिजनकनामधेयस्य राज्ञः सदसि हरचापारोपणं नाम नाटकमभिनीय परितुष्टेन राज्ञा समर्पितां रङ्गविद्याधरख्यातिं प्रियामिव समासादितवान् ।

11 नटः । स पुनः संप्रति कं देशमभिनन्दयति ।

---

5. A. मारिषः for नटः. B. एतावत् for एव. A. B. G. तत् for इदम्.

6. A. B. add इति after उपन्यस्यते. A. तु ज्यायान् भ्राता & B. तु भ्राता ज्यायान् after मम. A. °मो for °मनामा.

7. C. D. E. G. om. भाव. A. कीदृशः.

8. A. B. om. ननु. F. नाम for नाम्ना. C. D. E. F. G. दत्तोत्तरम्.

10. D. गुणानाम् for गुणग्राम. G. अभि° for अवि°. A. om. गुणारोम A. G. om. अपि. D. G. add कथम् before नाम्ना. C. E. F. have नाम्नैव before गुणा°. A. G. °जनकस्य. G. om. नामधेयस्य. A. B. नरपतेः. C. D. E. F. G. रूपकः B. तेन after °तुष्टेन. A. °ता रङ्गविद्या इत्या°. B. इतिख्या°. G. आख्या°. A. om. सम्.

11. B. आनन्दयति.

12 सूत्र०। केनापि दाक्षिणात्येन नटापसदेन मदीयमेवेदं गुणारामनामेति वदता रङ्गविद्याधरख्यातिरपहृता। तदाकर्ण्य गुणारामस्तामेव दिशं प्रचलितः। अधुना च श्रुतमस्माभिर्यत्किल सुकण्ठनाम्ना गायकेन सह मैत्रीं विधाय दाक्षिणात्यानां भूभुजां सदसि तेन सह रङ्गसङ्गरमुपक्रान्तवानिति।

13 नटः। अहो महानुपक्रमः।

14 सूत्र०। उचितमिदम्। यतः

कीर्तिं मृणालकमनीयभुजामानिन्द्र-
चन्द्राननां सितसरोरुहचारुनेत्राम्।
ज्योत्स्नास्मितामपहृतां दयितामिव स्वां
लब्धुं न कः परमुपक्रममातनोति ॥ ६ ॥

तत्कथय कार्यम्।

15 नटः। इदमेव यत्किल त्वयाभिनीयमानमवलोकयामः

प्रत्यङ्कमङ्कुरितसर्वरसाभिरामं
नव्योल्लसत्कुसुमराजिविराजिबन्धम्।
घर्मेतरांशुमिव वक्रतयापि रम्यं
नाट्यप्रबन्धमतिमञ्जुलसंविधानम् ॥ ७ ॥

16 सूत्र०। तत्कथं पुनरवधारणीयं किंनामधेयं नाटकमिति।

---

12. C. D. E. F. add हि after अपि. G. om. इदम्. A. B. E. F. add इति before नाम. A. B. om. इति after नाम. A. इत्याख्या°. B. इतिख्या°. G. आख्या°. B. add इदम् after श्रुतम्.

14. G. कीर्तिः. B. G. स्मित for सित. A. °ममुच्च° for °मुपक्र°.

15. A. B. वि for अव. C. D. E. F. add इति after विलोकयामः & अवतार for अभिराम. G. °रामनव्य°. F. विचित्र for विराजि. G. °ञ्जुरिव. D. G. अति for अपि. A. सन्धिभागम्.

16. A. om. तत्. F. om. धेयम्. C. सहासम्, G. सहर्षम् after विस्मृ

विमृश्य । कथं करस्थमेव चामीकरं रथ्यायां मृगयमाणस्य सरणिमनुसृतोऽस्मि । नन्विहैव श्लोकेऽष्टपङ्क्तिक्रमलिखिते स्फुटमस्ति प्रसन्नराघवनामेति ।

17 नटः । तमेव श्लोकं पठित्वा सहर्षम् । अहो देव्याः कविकुलकुमुदवनविकासचन्द्रिकायाः प्रसादमहिमा सरस्वत्याः । यस्मादेवंविधाः कवीनां विचित्रमधुराः सूक्तयः समुल्लसन्ति ।

18 सूत्र० । एवमेतत् । नन्वनेनैव कविनोक्तम् ।

वाणि त्वत्पदपद्मरेणुकणिका था स्वान्तभूमिं सतां
संप्राप्ता कविताळता परिणता सैवेयमुज्जृम्भते ।
त्वत्कर्णेऽपि चिराय यत्किसलयं सूक्तापदेशं शिरः-
कम्पभ्रंशितपारिजातकलिकागुच्छे विधत्ते पदम् ॥ ८ ॥

पुनर्विभाव्य । मम पुनः कविकुलकमलसद्मानि मुनौ वल्मीकजन्मनि मनः कौतुकितम् । यस्यैकमपि वदनारविन्दमासाद्य चतुर्मुखमुखकमलवनविहारविनोदमनुभवति भारती नाम राजहंसी ।

19 नटः । एवमेतत् । त्रिभुवनाभोगेऽपि हि

श्य. C. D. G. om. कथं...स्मि ; & with B. E. F. add अये कथमहं निजशिरः शेखर (B. om. शेखर) शयाल्वपि नीलोत्पलं रत्नाकरचपलवीचिमालापरिसरे विचारयामि. A. संनिवेशविशेषेण विन्यस्तम् for श्लोके...स्फुटम्. G. क्रमात्. F. आस्ते. A. C. °वं नाम. B. °वं नाम नाटकम्. D. °व नाट्यम्.

17. B. F. read नन्विहैव संनिवेशविशेषेण विन्यस्तमस्ति प्रसन्नराघवं नामेति before तमेव &c. A. om. देव्याः. G. only has कुल. C. E. F. वदन for वन, while G. has neither. A. om. विकास and F. विकासि. A. B. सरस्वत्याः प्रसादमहिमा. C. D. E. F. G. यत्प्रसादात् for यस्मात्. A. B. अयम् (which B. om.) एवंविध : कवीनां विचित्रमधुरः सारस्वतोद्गारः (A. adds समुल्लसति स्म.)

18. A. B. om. ननु. A. C. E. add हि after एव. B. only has कुल after कवि. D. G. om. one मुख.

भास्वद्वंशवतंसकीर्तिरमणीरङ्गप्रसङ्गस्वन-
द्वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा मुनिः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृताब्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ॥ ९ ॥

विमृश्य। मम तु रामचन्द्र एव निर्भरमानन्दितोऽयं चित्तचकोरः। यत्कीर्तिचन्द्रिकाचुम्बितोऽयं वाल्मीकेरपि सारस्वतसागरः समुल्ललास ।

20 सूत्र० । इत्थमिदम् ।

चन्द्रे च रामचन्द्रे च कान्तानां च दृगञ्चले ।
नीलोत्पलसुहृत्कान्तौ कस्य नो मोदते मनः ॥ १० ॥

अपि च

झटिति जगतीमागच्छन्त्याः पितामहविष्टपा-
न्महति पथि यो देव्या वाचः श्रमः समजायत ।
अपि कथमसौ मुञ्चेदेनां न चेदवगाहते
रघुपतिगुणग्रामश्लाघासुधामयदीर्घिकाम् ॥ ११ ॥

21 नटः । कथं पुनरमी कवयः सर्वेऽपि रामचन्द्रमेव वर्णयन्ति ।

22 सूत्र० । नायं कवीनां दोषः । यतः

स्वसूक्तीनां पात्रं रघुतिलकमेकं कलयतां
कवीनां को दोषः स तु गुणगणानामवगुणः ।
यदेतैर्निःशेषैरपरगुणलुब्धैरिव जग-
त्यसावेकश्चक्रे सततसुखसंवासवसतिः ॥ १२ ॥

---

19. G. अवतंस. A. कविः for मुनिः. A. C. E. F. om. विमृश्य . A. B. परम् for एव. F. om. चन्द्रिका. A. B. समुल्लसति स्म.

20. G. युक्तम् for इत्थम् ; & नारीणाम्. All except D. have नामोदते. A. G. एनम्.

21. C. D. E. F. G. om. अपि. A. has केवलमुप° & B. F. कुसुमारामामिव मधुव्रताः केवलमुप° before वर्णयन्ति.

22. A om. नायं...दोषः. A. B. F. om. यतः. B. F. °तिलकमेवा°. C. D. °करः for °गुणः . B. अस्नि

अपि च भोः

बीजं यस्य चिरार्जितं सुचरितं प्रज्ञा नवीनोऽङ्कुरः
काण्डं पण्डितमण्डलीपरिचयः काव्यं नवः पल्लवः ।
कीर्तिः पुष्पपरम्परा परिणतः सोऽयं कवित्वद्रुमः
किं वन्ध्यः क्रियते विना रघुकुलोत्तंसप्रशंसाफलम् ॥ १३ ॥

23 नटः। कः पुनरस्य कविः ।

24 सूत्र०। सप्रणयकोपम्।

विलासो यद्वाचाममृतरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥ १४ ॥

अपि च

लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मनः ।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥ १५ ॥

25 नटः। कथमविदितचन्द्रमसश्चकोराकिशोरकस्य चारितमनुसृतोऽस्मि। तेन हि मम हस्ते निजनाटकमर्पयित्वेदमुक्तोऽस्मि। रक्षणीयमिदं सूक्तिरत्नं चोरेभ्य इति। स च मया सविनयमिदमुक्तः।

कर्णे निधाय च विधाय च कण्ठपीठे
धृत्वा च मूर्धनि नते हृदये च कृत्वा ।

°धैरितर°. D. अपिच for अपर. C. E. प्रज्ञानबीजाङ्कुरः. D. F. प्रज्ञा नवीनाङ्कुरः. G. काण्डः. B. सूक्ति for कीर्ति. A. B. C. E. F. °परिणति :. D. फलैः.

24. A. B. G. असम for अमृत. D. G. °मधुर° for °मधर°. C. किमिह न & om. अपि च. G. कुक्षि for गर्भ.

25. A. B. चन्द्रचरितस्य. A. om. किशोरक. C. E. °किशोरस्य. B. येन. D. नव्न (न्व) हम् for मम हस्ते. D. विधाय for निधाय. A. G. पिधाय & D. निधाय for विधाय. A. B. कृत्वा for धृत्वा. B. तत: for नते. A. B. धृत्वा for कृत्वा. B. C. E.

चोरप्रचारचकितेन चिरं मयैष
त्वत्सूक्तिमौक्तिकगणः परिरक्षणीयः ॥ १६ ॥

26 सूत्र० । केयमलीकशङ्का तस्य कवेः ।

सुललितवचनामुदारवृत्तां
कृतिमथवा युवतिं परस्य हृत्वा ।
तटमपि परमर्णवस्य गत्वा
वद कतरः शुभभाजनं जनः स्यात् ॥ १७ ॥

27 नटः । एवमेतत् । नन्वयं प्रमाणप्रवीणोऽपि श्रूयते । तदिह चन्द्रिकाचण्डातपयोरिव कवितातार्किकत्वयोरेकाधिकरणतामालोक्य विस्मितोऽस्मि ।

28 सूत्र० । क इह विस्मयः ।

येषां कोमलकाव्यकौशलकलालीलावती भारती ।
तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते ।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता-
स्तैः किं मत्तकरीन्द्रकुम्भशिखरे नारोपणीयाः कराः ॥ १८ ॥

29 नटः । अपि नाम स्वयमेव कविताकोविदाः पारिषदा अस्य सूक्तिभिर्विनोदयिष्यन्ते ।

30 सूत्र० । अथ किम् । नन्वनेनैवोक्तम् ।

F. G. °अपहार. D. °अपचार. D. माणिः for गणः.

26. B. कथम् for केयम्. F. G. वदना for वचना. G. सुख for शुभ.

27. A. om. एवमेतत्. A. B. अहमस्य कवि...त्वयोश्चन्द्रि...रिव.

28. D. रचना for वचन & गज for करि.

29. A. B. F. read अमी for एव & have कथं भो : (A. कथम् only) after अस्य. G. विनोदिष्यन्ते.

30. A. कथं किं न स्वेनैवोक्तम्. B. अथ किं नाम तेनैवोक्तम्. All except A. read सन्तः कियन्तः. C. E. नव for घन.

अपि मुहुरुपयान्तो वाग्विलासैः स्वकीयैः
परभणितिषु तोषं यान्ति किं नैव सन्तः ।
निजघनमकरन्दस्यन्दपूर्णालवालः
कलशसलिलसेकं नेहते किं रसालः ॥ १९ ॥

31 नटः । अहो अस्य कवेः सूक्तीनां सरलता कोमलता च ।

32 सूत्र० । क्वचिद्वक्रता कठिनता च ।

33 नटः । कथमेते अपि रमणीये ।

34 सूत्र० । अथ किम् ।

निन्द्यन्ते यदि नाम मन्दमतिभिर्वक्राः कवीनां गिरः
स्तूयन्ते न च नीरसैर्मृगदृशां वक्राः कटाक्षच्छटाः ।
तद्वैदग्ध्यवतां सतामपि मनः किं नेहते वक्रतां
धत्ते किं न हरः किरीटशिखरे वक्रां कलामैन्दवीम् ॥ २० ॥

अपि च ।

अमृतजलधेः पायं पायं पयांसि पयोधरः
किरति करकास्ताराकारा यदि स्फटिकावनौ ।
तदिह तुलनामानीयन्ते क्षणं कठिनाः पुनः
सततममृतस्यन्दोद्गारा गिरः प्रतिभावताम् ॥ २१ ॥

35 नटः । नूनमस्य कवेः किमपि कौतुकप्रमोदमेदुरमन्तःकरणं यदेवंविधाः सरसशीतलाः सूक्तयः समुल्लसन्ति ।

36 सूत्र० । उचितमिदम् । यतः

---

31. C. D. E. कोमलता सरलता.

33. C. E. F. किम् for कथम्. A. B. ते for एते. D. परमरमणीये.

34. G. कथम् for अथ. B. शिव for हर. D. om. अपि च.

35. A. om. कवेः. B. om. किमपि. C. E. om. कौतुक.

36. All except A. om. यतः.

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणश्च बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ॥ २२ ॥

अपि च ।

न ब्रह्मविद्या न च राज्यलक्ष्मी-
स्तथा यथेयं कविता कवीनाम् ।
लोकोत्तरे पुंसि निवेश्यमाना
पुत्रीव हर्षं हृदये करोति ॥ २३ ॥

37 नेपथ्ये । साधु भोः कुशीलवकुलावतंस साधु ।

38 सूत्र० । कथमयं भगवतो याज्ञवल्क्यस्य प्रियोऽन्तेवासी दाल्भ्यायन इत एवाभिवर्तते । तदस्यानवलोकनीयचतुर्थवर्णस्य पुरतः स्थातु-मनुचितमस्माकम् । तदेहि परतो गच्छावः । इति निष्क्रान्तौ ।

प्रस्तावना ।

39 प्रविश्य दाल्भ्यायनः । तमेव श्लोकं पठित्वा साकूतम् । साधूक्तमनेन । तथा हि । भूपतिरयं जनकोऽपि सकललोकलोचनारविन्दमार्तण्डे क्वचिदपि पुरुषप्रकाण्डे निजां कन्यां समर्पयितुकामोऽस्मद्गुरूप-दिष्टायां ब्रह्मविद्यायां कुलक्रमागतायां च राज्यलक्ष्म्यां शिथि-लादरः संवृत्तः । कर्णं दत्त्वा । कथमयमाकाशे वीणाध्वनिः श्रूयते ।

D. हासोभासः. All except D. have तु for च.

38. C. D. E. F. प्रियान्ते. ° B. न पुरतः स्थातुमुचितम्. C. पुरः for पुरतः. A. पुरंतः.

39. A. ततः प्रविशति. A. B. om. साकूतम्. B. adds एवमेतत् after अनेन. A. कन्यकाम्. A. B. अयम् for अस्मद्. C. E. क्रमात्. D. G. om. च after °गतायाम्. B. F. राज.° B. D. G. add च after °लक्ष्म्याम्. B. G. पुनः before कर्णम्. D. कर्णौ. B. मया for अयम्. A. संघट्ट. B. पुनर्विमृश्य

तन्नूनमस्मद्गुरुमभ्यागच्छता समीरसंघट्टनकलक्कणद्वल्लकीगुणेन देवर्षिणा नारदेन भवितव्यम् । विलोक्य । कथं ध्वनिसादृश्येन प्रतारितोऽस्मि । नन्वयं गगनतलावलम्बिनोर्मधुकरयोरेव ध्वनिराकर्ण्यते । पुनः कर्णं दत्त्वा सहर्षविस्मयम् । अहो भगवतो योगीश्वरस्य प्रसादमहिमा । येनाहमेवंविधानामपि वचनाववोधमधुरां सिद्धिमासादितवानस्मि । तदाकर्णयामि तावत्किमेतावालपत इति । कर्णं दत्त्वा । एकः किमाह । सखे कलालाप कुत आगतोऽसि । अपरः किमाह । वयस्य मधुप्रिय सततविकस्वराच्चन्द्रमौलिमौलिमन्दाकिनीकुमुदकाननात् । अहो अनयोश्चतुरालापपेशलता रुचिरनामधेयता च । पुनः कर्णं दत्त्वा । किमाह मधुप्रियः । अस्ति तत्र नवीनः कोऽपि वृत्तान्तः । किमाह कलालापः । अस्ति । अचिरमेव कदापि खलु बलिनन्दनो बाणासुरः कमलमालया भगवन्तमिन्दुमौलिमभ्यर्च्य सविनयमिदमूचिवान् । यत्किल भगवन्

कैलासाधिकसारं किमस्ति वस्तु महीतले ।
यस्मिन्सफलतामेति मम दोर्दण्डमण्डलम् ॥ २४ ॥

---

for विलोक्य. A. B. सादृश्यात्. C. E. F. श्रूयते. A. सहर्षं सविस्मयम्. C. E. F. योगीश्वरस्य भगवतः. D. स्वन for वचन. B. °माधुरीप्रसिद्धिम्. G. om. तावत्. A. C. D. E. G. om. इति. A. om. एकः किमाह. B. F. om. किमाह. A. कुत इति प्रष्टव्योऽसि. B. कुतःप्रयातोऽसि. A. मुनि before अपरः. F. om. किमाह. B. सखे after वयस्य. D. G. मधुरप्रिय throughout. B. G. सन्तत. A. B. D. G. om. one मौलि: A. C. E. F. °वनात्. D. F. वाल्म्यायन: before अहो &c. C. आलापपेशलता & आलापपेलवता for नामधेयता: B. C. D. F. G. om. तत्र. A. मुनिः before किमा ... लापः. C. E. F om. कदापि. B. कदाचिदपि. A. अर्चितवान्. D. om. यत्किल भगवन्. A. B. (A. मुनिः ।) किमाह चन्द्रमौलिः

ततश्च विहस्य भगवानिदमाह चन्द्रमौलिः।

अस्ति मे कार्मुकं दिव्यं न्यस्तं जनकभूभुजि ।
यस्य बाणानले तिस्रः पुरः प्राप्ताः पतङ्गताम् ॥ २९ ॥

तदाकर्ण्य बलिनन्दनो बाणासुरस्तत्कार्मुकं विलोकयितुं मिथिलामागतः। तत्कथय । भवान्कुतः समायातः कीदृशो वा तत्र नवीनो वृत्तान्त इति । किमाह मधुप्रियः । अहमागतोऽस्मि नन्दनवनात् । अथ च तत्र । मया लङ्केश्वरानुचरस्य गर्जितमाकर्णितम् । आः कथं रे नन्दनवनरक्षिणः अद्याप्यनर्चितचन्द्रचूड एव निशाचरचक्रवर्तिनि विलूनसकलप्रसूनं नन्दनवनमिति। ततस्तैरिदमुक्तो निशाचरः । क्षन्तव्यमेतत् । अद्य हि जनकराजकन्यकावीरस्वयंवरविलोकनकौतुकितसकलसुरलोकविमानमण्डनाय महान्कुसुमोपयोगः । तदाकर्ण्य च इममेव वृत्तान्तमुपायनीकरोमि लङ्केश्वरस्येति प्रचलितो निशाचरः । अहमपि कौतुकादिहागतोऽस्मि । सविषादम् । अहो महानयमनर्थाङ्कुरोद्भेदः । यदयं बाणरावणयोः कर्णान्तिके विश्रान्तः सीतास्वयंवरवृत्तान्तः । अथवा अलमतिकातरतया । भ्रमारोपिता अपि भ्रमरोक्तयः संभवन्ति । विमृश्य । कुतो वा भ्रमरसंभावना।

---

for ततश्च &c. G. इदमाह च भगवानिन्दु°. D. °चूडः for मौलिः. A. C. D. E. G. om. च after आकर्ण्य. C. D. E. F. G. om. बलि ... सुरः. D. चतुर्मुखम् for तत्कार्मुकम्. A. समायातः for आगतः. C. E. इह समागतः। अहमिहागतः. D. G. स तत आगतः (G. तत्र गतः)। अहमिहागतः; F. इह समागतः। अहमपीहागतः for मिथिलामागतः. G. adds कुतः पुनस्त्वमिह. A. मुनिः and the rest वात्स्यायनः before किमाह &c. B. अद्य for अथ. A. B. om. च. F. om. अथ च. B. C. E. F. मया तत्र. C. F. लङ्केश्वरस्य. A. इदम् after गर्जितम्. C. D. E. F. G. नन्दनवनस्य. A. वर्तीति. G. स्तव. A. om. इति. D. om. इदम्. G. कुतूहलित. B. om. विमान. B. आकर्ण्यैव तमेव. D. om. च. B. इति after °करोमि. For the whole passage from ततः up to प्रचलितो निशाचरः. A. has मुनिः। किमूचुस्ते। कथं रे अविदितं ते। अद्य शाम्भवचापारोपणपणितजनकसुतास्वयंवरावलोकनमानविमण्डनाय सुराणां महान्कुसुमोपयोग इति । मुनिः। किमाह

यतः मकरन्दरसस्यन्दसुन्दरोद्गारधारिणौ ।
श्रवणानन्दिनावेतौ बन्दिनाविव राजतः ॥ २९ ॥

40 नेपथ्ये । साधु भगवन्विज्ञातम् । बन्दिनावेव खल्वावाम् नानादिगन्तसमागतनृपतिचक्रवर्णनाय जनकेन समादिष्टौ ।

41 दाल्भ्यायनः । अहो घुणाक्षरन्यायः । यदिदं भ्रमरद्वयं प्रति मयोक्तं बन्दिद्वये फलितं वचः । भवतु । तमिमं भ्रमरवृत्तान्तमस्मद्गुरवे निवेदयामि । इति निष्क्रान्तः ।

विष्कम्भकः ।

ततः प्रविशति बन्दिद्वयम् ।

42 एकः । वअस्स मञ्जीरअ पेक्ख पेक्ख गइन्ददसणसिणिद्धसलाआसहस्सणिम्मिदेसु मञ्चएसु आसीणा इमे कुङ्कमकिदअङ्गरा-

---

42 वयस्य मञ्जीरक प्रेक्षस्व प्रेक्षस्व । गजेन्द्रदशनस्निग्धशलाकासहस्रनिर्मितेषु मञ्चकेष्वासीना इमे कुङ्कमकृताङ्गरागा राजानोऽमलस्फटिकप्रासादशिखरासङ्गिनः कनकसिंहा इव राजन्ते । अमुग्धदुग्धसागरशिखरावलम्बिनोऽभिनवोद्गच्छन्निशाकरबिम्बप्रतिबिम्बा इव शोभन्ते ।

राक्षसः । तदिमं वृत्तान्तं स्वामिनः श्रुतिगोचरं करोमीति प्रचलितो निशाचरः । मुनिः । किमाह मधुप्रियः. A. om. महान्. G. om. अयम्. A. यतः for यद्दयम्. A. कर्णभुवि. B. कर्णभुवम्. D. G. कर्णान्तिकम्. C. D. E. G. add अपि before विश्रान्तः. C. D. E. F. add इति after °वृत्तान्तः. A. B. अलीक for अति. D. भ्रमरोद्गीतयः. A. om. विमृश्य... वना. B. भ्रम for भ्रमर. B. G. om. यतः. B. °नन्दनौ for °नन्दिनौ. A. राजतुः.

40. A. भगवन् साधु. A. B. add सत्यम् before बन्दिनौ. D. om. खलु

41. G. °द्वयं प्रति for °द्वये. A. om. भवतु. G. तत् for तम्. B. om. तमिमम्. F. om. भ्रमर before वृत्तान्त. G. adds इति & E. शुद्ध before विष्कम्भकः.

42. A. om. इमे. A. B. D. G. कुङ्कमकअङ्ग° C. कुङ्कमकिअअङ्ग. A. अङ्गराइणो & om. राआणो. D. om. पासाअ. C. E. F. पासाण ; & अवलम्बिणो for आसङ्गिणो. B. G. रेहन्ति; C. रेजन्ति & F. रेज्जन्ति for राअन्दि which A. D. omit. C. D. E. F. आहिणिग्गमन्त.

आ राआणो अमलफडिअपासादसिहरासङ्गिगो कणअसिंहा विअ राअन्दि । अमुद्ददुद्धसाअरलहरीसिहरावलम्बिणो अभिणवुग्गमन्ताणिसाअरबिम्बप्पडिबिम्बा विअ सोहन्दि ।

43 मञ्जीरकः । सखे नूपुरक पश्य पश्य ।

स्वां स्वां दिशं श्रितवता निवहेन राज्ञां
मञ्चावलीवलयमाकलितं विभाति ।
सीतास्वयंवरविलोकनकौतुकेन
पुञ्जीकृताकृति दिशामिव चक्रवालम् ॥ २७ ॥

अपि च ।

नटति नरवराग्र्यग्रसूत्राग्रलग्ना
द्विपदशनशलाका मञ्चपाञ्चालिकेयम् ।
त्रिपुरमथनचापारोपणोत्कण्ठितानामतिरभसवतीव क्ष्माभृतां चित्तवृत्तिः ॥ २८ ॥

44 नूपुरकः । वअस्स मञ्जीरअ को इमो सीदाकरग्गहवासणावसन्तलच्छीविअसन्तपुलअमुउलजालमण्डिदं निअभुअसहआरसाहिजुअलं विलोअन्तो चिट्ठदि ।

45 मञ्जी० । स एष निजयशःपरिमलप्रमोदितचारणचञ्चरीकचयकोलाहलमुखरितदिक्चक्रवालः क्ष्मापालः कुन्तलालङ्कारो मल्लिकापीडो नाम ।

---

44 वयस्य मञ्जीरक कोऽयं सीताकरग्रहवासनावसन्तलक्ष्मीविकसत्पुलकमुकुलजालमण्डितं निजभुजसहकारशाखियुगलं विलोकयंस्तिष्ठति ।

---

43. A. B. अये for सखे. A. om. one पश्य. G. श्रितवताम्. A. नट for नर. B. D. G. °लग्न.° B. पञ्चालिका. A. B. क्ष्माभुजाम्.

44. A. B. add सहर्षम् & om. मञ्जीरअ. B. °ग्गहण. C. D. E. F. G. विलसन्त. D. मण्डल for मुउल. A. मण्डिद.° A. वट्टदि.

45. D. om. स. C. adds चारण

46 नूपु०। इमो उण को। जो किल दूरावसारिअकणअकडअप्पअडिअधणुग्गुणकिणकिसअलेहामण्डणे भुअदण्डे पुलोवन्तो चिट्ठदि।

47 मञ्जी०। सोऽयं कुबेरदिगङ्गनाललाटतटविलासलम्पटः काश्मीरतिलकः कर्पूरतिलको नाम।

48 नूपु०। इमो उण को णिअप्पदावदिणअरुग्गमपुव्वगिरिसिहरसहअरं दक्खिणभुअदण्डं उण्णमिअ वट्टदि।

49 मञ्जी०। स एष निजप्रतापप्रभापटलपिञ्जरितमलयाचलनितम्बतटः काञ्चीमण्डनो वीरमाणिक्यनामा नृपतिः।

50 नूपु०। को इमो हरसुल्लसन्तपुलअजालविसंठुलकपोलत्थलचालिदकुण्डलसरिसनिवेसणावदेसेण पअडिअहरसरासणकण्णऊरमणोरहो राअदि।

---

46 अयं पुनः को यः किल दूरावसारितकनककटकप्रकटितधनुर्गुणकिणकषणलेखामण्डने भुजदण्डे विलोकयंस्तिष्ठति।

48 अयं पुनः कः। निजप्रतापदिनकरोद्गमपूर्वगिरिशिखरसहचरं दक्षिणभुजदण्डमुन्नमय्य वर्तते।

50 कोऽयं हर्षोल्लसत्पुलकजालविसंष्ठुलकपोलस्थलचालितकुण्डलसदृशनिवेशनापदेशेन प्रकटितहरशरासनकर्णपूरमनोरथो राजते।

---

before निज. D. आ for प्र. G. °वाल° C. E. F. G. कपाल.° C. E. F. कुल for कुन्तल.

46. B. C. E. F. G. कइमो for को. A. adds एसो & om. जो किल. A. दूरदोवि° & B. दूरतरअव.° G. om. कणअ. A. पडिबद्ध & D. पभासिअ for प्पअडिअ. A. C. °मण्डणो & G. °मण्डले. A.° भुअदण्डो. A. पेक्खन्तो & B. पच्छरितो. A. वट्टदि.

47. B. E. F. add प्रतापप्रभापटलपिञ्जरितविङ्मुखः after अयम्. A. B. D. G. om. कर्पू...नाम.

48. A. B. प्पहाव & D. प्पणाव (?) for प्पदाव. D. सहअर°. B. C. E. F. णिअ for दक्खिण.

49. D. पञ्जरित. A. तट°. G. वार for वीर.

50. C. E. F. add उणो after को. B. C. D. E. F. रह° for हर°. A. हरसमु°. A. D. G. om. जाल. D. चलव & G. चल. D. सरस. B. सरिस. B. C. D. E. °मणोहरो.

51 मञ्जी० । सोऽयमसमसमरमहार्णवैकमकरो मत्स्यराजः ।

52 नूपु० । इमो उण को अमलमलअजरसधवालिअणिअभुअदण्ड-विडम्बिअभुअङ्गराअसिरी सिरीसकुसुमसुउमारं माररिउसरासणं कलअन्तो विप्फुरदि ।

53 मञ्जी० । स एष विमलमुक्तावलीविराजमानवक्षस्तटस्तुङ्गभुजतरङ्गः सिन्धुराजः । तदलमनेन । प्रस्तुतं तावदुपक्रमावहे । परिक्रम्योच्चैः। अहो राजान आकर्णयत

आकर्णान्तं त्रिपुरमथनोद्दण्डकोदण्डनद्धां
मौर्वीमुर्वीवलयतिलकः कोऽपि यः कर्षतीह ।
तस्यायान्ती परिसरभुवं राजपुत्री भवित्री
कूजत्काञ्चीमुखरजघना श्रोत्रनेत्रोत्सवाय ॥ २९ ॥

पुनः सकौतुकम् । सखे दृश्यन्ताममी

कामारिकार्मुकविकर्षणकौतुकोर्मि-
रोमाञ्चितद्विगुणपीवरबाहुदण्डाः ।
सीताकरग्रहमिलत्कुतुकातिमात्र-
विस्तार्यमाणहृदयाः परितो नरेन्द्राः ॥ ३० ॥

---

52 अयं पुनः कोऽमलमलयजरसधवलितनिजभुजदण्डविडम्बितभुजङ्गराजश्रीः शिरीषकुसुमसुकुमारं माररिपुशरासनं कलयन्विस्फुरति ।

---

51. G. रण for समर. A. omits this speech.

52. G. om. णिअ. B. adds भोअ before सिरी. C. E. F. भोअ for सिरी. D. om. कुसुम. C.E.F °सुउमा· रोकाम°. D. पुरोभतो (?) for कलअन्तो. A. omits this speech also.

53. G. तट°. A. B. तुङ्गतर. G. भुजङ्गतरङ्ग. D. G. प्रकृतम्. D. उपाक्र°. C. D. E. F. G. °महे for °वहे. A. आकर्णयन्तु. G. adds one more आकर्णयत. A. B. D. F. दृश्यताम् & G. पश्यताम्. B. D. G. विस्तीर्य°. G. adds अये before कथम्. B. °समयम्. A तट for तल.

पुनः सहर्षम् । कथमुच्चलितमेव समसमयसञ्चरणमिलत्कपोलतलसंघट्टमसृणरणन्मणिकुण्डलेन राजमण्डलेन ।

54 नूपु० । पुलोवेहि पुलोवेहि । इमाणं अण्णोण्णसंघट्टन्तकेऊरसमुच्चलन्तकणअकणमिसेण प्पआवाग्गिणो विप्फुलिङ्गा विअ दीसन्ति ।

55 मञ्जी० । विहस्य । सखे

पश्य पश्य सुभटैः स्फुटभावं
भक्तिरेव गमिता न तु शक्तिः ।
अञ्जलिर्विरचितो न तु मुष्टि-
र्मौलिरेव नमितो न तु चापः ॥ ३१ ॥

56 नूपु० । कहं आरम्भरमणिज्जो इमाणं संरम्भो ।

57 मञ्जी० । सविषादम् ।

आद्वीपात्परतोऽप्यमी नृपतयः सर्वे समभ्यागताः
कन्येयं कलधौतकोमलरुचिः कीर्तिश्च लाभः परः ।
नाकृष्टं न च टङ्कृतं न नमितं स्थानाच्च न त्याजितं
केनापीदमहो धनुः किमधुना निर्वीरमुर्वीतलम् ॥ ३२ ॥

---

54 विलोकय विलोकय । एषामन्योन्यसंघट्टमानकेयूरसमुच्चलत्कनककणमिषेण प्रतापाग्नेर्विस्फुलिङ्गा इव दृश्यन्ते ।

56 कथमारम्भरमणीय एषां संरम्भः ।

---

54. B. पेक्खव पेक्खव, & समुल्लसन्त. A. कङ्कण for कण. B. प्पभाव & D. वडवा for प्पआव. F. प्फुलिङ्गा :. C. D. E. सन्ति.

55. D. G. om. सखे.

56. D. कमा (?) रम्भणीओ. D. G. जेव्व before इमाणं.

57. D. सु for च. All except B. have लाभास्परम्. F. कष्टं केन न for नाकृष्टं न च. G. टात् for टम्. D. E. टङ्कितम्. A. B. नोच्चालितम् for न त्याजितम्. A. D. महद्धनुरिदम् for धनु...धुना .

58 नेपथ्ये । आः कोऽयमलीकवैतालिको धनुर्मात्रकेऽपि नमयितव्ये निर्वीरमुर्वीतलं व्यपदिशति ।

59 नूपु० । वअस्स कस्स इमो महीअलचलन्तराहुरथचक्करवकक्कसो कण्ठधुणी सुणीअदि ।

60 मञ्जी० । ममाप्ययमपरिचितः । तदेनं पृच्छामि तावत् । परिक्रम्य । अये कः खलु भवान्यः सकलदेशदर्शिनो ममापि न विज्ञातः ।

61 प्रविश्य पुरुषः । साटोपं परिक्रम्य सक्रोधम् । आः पाप वैतालिकापसद कतिपयग्रामटिकापर्यटनदुर्विदग्ध कथं मामपि दश । इत्यर्धोक्ते स्वगतम् । कथं संवरणीयमेव विवरितुमुपक्रान्तोऽस्मि । भवतु । इदमेव तावन्निर्वाहयामि । प्रकाशम् । कथं मामपि दशदिग्विलासिनीकर्णपूरीकृतकीर्तिपल्लवं त्रिभुवनवीरनामधेयं कूपमण्डूक इव सागरमविज्ञातमपदिशसि । तत्कथय तावत्कुत्र तत्कर्णान्तनिवेशनीयगुणं कन्यारत्नं कार्मुकं च ।

62 मञ्जी० । इदं तावत्कार्मुकम् । कन्या तु चरमं लोचनपथमवतरिष्यति ।

---

59 वयस्य कस्यायं महीतलचलद्राहुरथचक्ररवकर्कशः कण्ठध्वनिः श्रूयते ।

---

58. A. B. om. अपि. G. उपविशति.

59. C. E. om. कस्य. D. om. रव. C. E. F. सहो.

60. C. E. G. मया for मम. B. तेनेमम् for तदेनम्. A. om. तावत्. D. G. अहो for अये. E. places अपि before मम. B. अविज्ञातः. D. अविख्यातः & G. न विख्यातः.

61. A. सक्रोधम् for साटोपम्. B. कोऽयमलीक° for पाप; °सदः. A. °पर्यटन. B. D. दुर्विदग्धः. A. B. रे after कथम्. B. अर्धोक्तेः. C. D. E. F. G. om. एव. E. अपक्रान्तः. D. G. om. प्रकाशम्. B. कथं रे. A. B. सागरमिव. A. B. D. G. अविख्यातम्. A. उपविशसि. C. D. E. G. insert क्व before तावत्. C. D. E. F. G. om. कुत्र तत्. B. C. E. F. अन्तिक for अन्त. C. E. निशमनीय; F. शमनीय; & G. निशमय for निवेशनीय.

62. A. D. कन्यारत्नम्. B. °तरिष्यते.

63 पुरुषः । ससंरम्भम् । धिङ्मूर्ख कथं राशिनक्षत्रपाठकानां गोष्ठीं न दृष्टवानसि । तेऽपि कन्यामेव प्रथमं प्रकटयन्ति चरमं धनुः ।

64 मञ्जी० । स्वगतम् । कथमयं वाचाटतां प्रकटयति । भवतु । अनयैव तावदेनं निवारयामि । प्रकाशम् । अये एतावति वीरमण्डले भवानेव न क्षत्रविद्याकुशलः ।

65 पुरुषः । सक्रोधम् । आः कथं रे अहमेव क्षत्रविद्यायामकुशलः ।

66 मञ्जी० । तत्कथं कार्मुकमन्तरेणैव कन्याविलोकनायोत्कण्ठसे ।

67 पुरुषः । साटोपं परिक्रम्य । कथं ममापि चापारोपणे संशयः ।

68 मञ्जी० । अथ किम् ।

69 पुरुषः । तदेष ममाभिसंभाव्यते यदि

विनैवाम्भोवाहं बहलरुचिलिप्ताम्बरतला
तडिल्लेखा हेमद्युतिविततिरम्या विलसति ।

यदि वा

विनैव स्वर्गङ्गां नभसि रभसोन्मुक्तशफरी-
परीवर्तैः साकं स्फुरति नवनीलोत्पलवनम् ॥ २२ ॥

---

63. A. om. रे राशि°. A. B. अपि after पाठकानाम्. B. F. गोष्ठीः. D. आकृतवान्. A. B. हि for अपि which F. om. B. रे before कन्या. A. B. प्रकाशयन्ति. A. B. एव before धनुः.

64. B. अथ for अयम्. वाचालताम्. प्रथयति. A. om. एनम्. A. F. om. अये. B. एक before एव.

65. A. om. सक्रोधम्. D. नक्षत्रविद्यायामेव कुशलः for अहम्... कुशलः.

66. B. adds आरोपण & D. विलोकन after कार्मुक.

67. A. सक्रोधम् before साटोपम्.

68. A. एवमेव after किम्.

69. A. C. E. F. G. तदेषः. D. तदेव. B. ममापि संशयः. All except G. have अपि for अभि. E. F. यादृक्. F. G. °तलात्. A. om. यदि वा. F. च for वा. B. पृषत for रभस. All except F. have उन्मुग्ध.

विलोक्य सविस्मयम् । कथमस्मत्प्रतिज्ञाभङ्गाय विपरीतं सृष्टिनैपुण्यं प्रणीतवान्विधिः । नन्विदं तथैव पश्यामि । विमृश्य । अथवा क एष विधिरपि मद्विरोधाय ।

मयि क्षीरोदन्वन्निभृतमुराजिन्नाभिनलिनीं
निजक्रीडावापीजलकमलिनीं कर्तुमनसि ।
पदभ्रंशाशङ्की मधुरमधुरालापचतुरै-
श्चतुर्भिः स्वैर्वक्त्रैरनुनयपरोऽभूदयमपि ॥ ३४ ॥

पुनर्निपुणं निरूप्य । अये सादृश्यात्प्रतारितोऽस्मि ।

तडिल्लेखा नेयं विलसति परं सौधशिखरे
वसन्त्याः कस्याश्चित्कनकरुचिरा गात्रलतिका ।
अपीदं नोन्मीलत्कुवलयवनं मीनतरलं
परं तस्या एव स्फुरति नयनालोकललितम् ॥ ३५ ॥

विभाव्य । नूनं तदेतत्सीताभिधानं कन्यारत्नम् । पुनः सहर्षम् ।

राजीव जीवसि मुधा न सुधाकरत्व-
मस्याः समः पदनखस्य कुतो मुखस्य ।
अग्रे दृशोर्मृगदृशः कतमः कुरङ्ग-
स्तत्खञ्जन त्वमपि किं जनरञ्जनाय ॥ ३६ ॥

पुनः सरभसम् ।

कदली कदली करभः करभः
करिराजकरः करिराजकरः ।

G. सविषादम्. B. विपरीत°. D. G. नैपुणम्. B. विनीतवान्. A. B. विधिरपि क एष. D. सादृश्य°. G. सादृश्येन. C. D. E. F. G. उन्मज्जत्. D. लसितम् for ललितम्. G. एव for एतत्. A. B. F. कतरः. A. तरङ्गः for कुरङ्गः. A. om. पुनः before सरभसम्. A. बिभर्तु.

भुवनत्रितयेऽपि बिभर्ति तुला-
मिदमूरुयुगं न चमूरुदृशः ॥ ३७ ॥

70 मञ्जी०। सखे नूपुरक किमेतत्कस्याश्चिदपि हस्तादादाय सानन्दमालोकयत्यन्तःपुरिको जनः।

71 नूपु०। अहमीरिसं संभावेमि। जं किर गुरुभवणादो आअदाए चन्दणिआए समप्पिदं चित्तपडं पुलोवेदित्ति।

72 मञ्जी०। तत्किं स त्वया दृष्टश्चित्रपटः।

73 नूपु० अध इम्।

74 मञ्जी०। तत्कथय किं तत्र लिखितम्।

75 नूपु०। भट्टदारिआ अण्णच्च कोवि णीलुप्पलदामसामलओ कुसुमसरसरिसरूओ कुण्डलीकिदहरचावो चक्कवट्टिकुमारो।

76 मञ्जी०। अहह मुग्धः खल्वबलाजनः। यदेवमपि कठोरप्रतिज्ञे राजनि किशोरवयसं जामातरमाशंसति। सखे जानासि केन लिखितं चित्रमिति।

---

71 अहमीदृशं संभावयामि। यत्किल गुरुभवनादागतया चन्दनिकया समर्पितं चित्रपटं विलोकयतीति।

73 अथ किम्।

75 भर्तृदारिका अन्यश्च कोऽपि नलिनोत्पलदामश्यामलः कुसुमशरसदृशरूपः कुण्डलीकृतहरचापश्चक्रवर्तिकुमारः।

---

70. B. om. सखे & has अन्तःपुरिकाजनः. A. omits this speech.

71. A. B. परि in place of ईरिसं. D. आआणाए (?) for आअदाए. A. B. E. om. त्ति at the end.

72. C. D. E. F. G. om. तत्किम्.

73. & 74. G. om. these speeches.

75. D. भट्टारिआ. All except F. have राव before अण्णच्च. B. C. E. F. सउमालो for सामलओ. A. रुचिओ for रूओ.

76. F. अहो for अहह. E. राज्ञि. A. B. अपि before जानासि.

77 नूपु ०। जाणामि। महेसिणो जण्णवक्कस्स दुदिअधम्मआरिणीए।

78 मञ्जी ०। सहर्षम्। इदानीमुद्भिन्नो मम मनोरथाङ्कुरः। देवी हि मैत्रेयी सिद्धयोगिनी कालत्रयदर्शिनी नालीकमालिखति।

79 नूपु ०। सव्वं सम्भावीआदि जइ इमो जरठङ्गो इदो अवसरदि।

80 मञ्जी ०। आः कोऽयम्। एनमपसारयामि। उच्चैः। अये कि-मितस्ततो विलोकयसे। नन्विदं शाम्भवं धनुः। तदिहैव दीय-तां दृष्टिः।

81 पुरुषः। आः किमुच्यते दृष्टिरिति। नन्वयं मुष्टिरपि दीयते। परि-क्रम्य शेखरभ्रंशमभिनीय सविषादं विलोकयति।

82 मञ्जी ०।

अयेऽलङ्कशविस्रस्तशेखरालोकनेन ते।
समयो याति तत्तूर्णं गृहाण हरकार्मुकम्॥ ३८॥

83 पुरुषः। आत्मगतम्। कथमनेन विदितोऽस्मि। विमृश्य। अथवा घुणाक्षरन्यायागतं शब्दसादृश्यमेतत्। प्रकाशं ससंरम्भम्।

---

77 जानामि। महर्षेर्याज्ञवल्क्यस्य द्वितीयधर्मचारिण्या।
79 सर्वं संभाव्यते यद्ययं जरठाङ्ग इतोऽपसरति।

---

77. A. दुहिदाए. G. दुहिअए.

78. A. om. सहर्षम्. G. सा before नालीक &c.

79. B. C. जठर for जरठ. A. अवसरिस्सदि.

80. A. places अहम् & C. D. E. F. G. किमिदम् before एनम्. C. D. E. F. G. om. उच्चैः. D. ततमालोकसे. C. अव for वि. A. E. F. विलोकसे. D. om. धनुः. A. इति at the end.

81. A. B. om. आः ... इति. A. G. इयम् for अयम्. C. E. om. दीयते. A. B. विलोकयते.

82. C. अवलोक°. B. किम् fo ते.

83. A. B. D. G. स्वगतम्. D. न्यायेन & G. गत for आगत. Dr °गत.° B. अक्षर for शब्द. A. मात्र

सावहेलकमनीयमुदस्य
क्रीडयैव विनिबध्य च मौर्वीम् ।
कृष्टमेव हरकार्मुकमेत-
द्दृश्यतामसुहृदां हृदयं च ॥ ३९ ॥

धनुषि हस्तमर्पयित्वा स्वगतम्। कथं न चलत्यपि। भवतु। प्रकाशम्। अये धनुरिति वक्रः पन्थाः। तत्सरलेनैव करवालधारापथेन सीतामानयामि।

84 मञ्जी०। कथमतिप्रगल्भसे। न विलोकयसि किम्।

रोषारुणीकृतविलोचनकान्तिभिन्न-
भ्रूभङ्गभीमघटितभ्रुकुटीविटङ्कम् ।
उत्खातलोलकरवाललताकराल-
दोर्दण्डचण्डचरितं नरवीरचक्रम् ॥ ४० ॥

85 पुरुषः। कृपाणमुद्यम्य परितो विलोक्य। पश्यत।

निर्भिन्नवैरिकरिकुम्भतटीविमुक्त-
मुक्ताफलप्रकरताराकिताम्बरश्रीः ।
यः कालरात्रिरिव भाति रणे स एष
रे रे नृपा मम कृपाकृपणः कृपाणः ॥ ४१ ॥

आकाशे कर्णं दत्त्वा। किं ब्रूथ।

एकः कथं बहुतरैः सुभटैः करोमि
संग्रामडम्बरमिति त्यज रे विषादम् ।

---

for सादृश्य. G. °लेप for °हेल. D. G. दृश्यमत्रसुहृशो हृदयं च. A. B. एष after वक्रः. G. om. एव after सरलेन.

84. A. om. न ... किम् G. om. किम्. A. °कम्प for °खात & नृप for नर. F. reads the first two lines as the last two.

85. D. G. have पश्यत twice. A. करे for रणे & repeats किं ब्रूथ & has सुभट for सुलभ. F. विधेहि & समरे सहैव. A. adds पुरुषः before

यं मन्यसे सुलभमत्र सहैव तेन
चेतो निधेहि समरे समरेखयैव ॥ ४२ ॥

अहो धृष्टता मनुष्यकीटकानाम् । तदेतान्निजमूर्त्यैव तावद्भीषयामि । इति साटोपं निष्क्रान्तः ।

86 नेपथ्ये ।

मन्दाकिनीकनकपद्मबिसाङ्कुराणां
किञ्चोग्रदिग्गजलसद्दशनाङ्कुराणाम् ।
उन्मूलनैरलमनीयत शैशवं यै-
स्तेऽमी निजा मम भुजाः प्रकटीभवन्तु ॥ ४३ ॥

ततः प्रविशति निजरूपेण दशकण्ठः ।

87 नूपु० । वअस्स पेक्ख पेक्ख कोदूहलं जं एकस्सवि माणुसस्स दस मत्थआइं ।

88 मञ्जी० । नैष मानुषः । राक्षसराजः खल्वसौ दशकण्ठः ।

89 नूपु० । ता परित्ताअदु मं वअस्सो । णं रक्खसमेत्तो जेव्व सम्मुहपडिदं माणुसं चव्वेइ । किं उण रक्खसराओ ।

90 मञ्जी० । अलं कातरतया । सकलवीरवृन्दवन्दनीया हि बन्दिजातिः । तत्कथमस्मद्विधेषु सकलभुवनैकवीरो विपरीतं वर्तिष्यते दशकण्ठः ।

---

87 वयस्य प्रेक्षस्व प्रेक्षस्व कौतूहलं यदेकस्यापि मानुषस्य दश मस्तकानि ।

89 तत्परित्रायतां मां वयस्यः । ननु राक्षसमात्र एव संमुखपतितं मानुषं चर्वति । किं पुना राक्षसराजः ।

अहो. A. B. E. F. G. कीटानाम्. C. D. E. F. om. तावत्. C. D. G. om. इति before साटोपम्.

86. A. उन्मीलन. D. च सम् for अलम्. A. °भवन्ति. B. दशकन्धर.

87. C. om. one पेक्ख. D. om. जं.

88. A. B. सखे before नैष &c. B. किन्तु before राक्षस°.

89. A. om. ता. F. repeats परित्ताअदु. A. B. om. णं. A. ण माणअदि for चव्वेइ.

90. D. om. हि. C. E. F. °विध.

91 नूपु०। सहर्षम्। जदि ईरिसं ता किंपि इमं णीसङ्को भविअ पुच्छिस्सम्। उपसृत्य। अए किंति एत्तिआइं मत्थआइं उव्वहीअन्दि। किंति वा एक्कं रक्खिअ अवराइं जत्त कुत्तवि ण णिक्खिप्यन्ति।

92 रावणः। आः पाप कथमस्थाने शिरश्छेदवार्तयामङ्गलमावेदयसि। तदेष केवलं वैतालिक इत्युपेक्ष्यः।

93 मञ्जी०। स्थाने शिरश्छेदवार्ताऽपि भवतो मङ्गलाय।

94 रावणः। अथ किम्। ननु रे

विद्याधरप्रणयिनीकरपल्लवाग्र-
लीलाविमुक्तकुसुमप्रकरावकीर्णे।
श्रीन्चद्रचूडचरणे च रणे च कामं
छिन्नोऽपि मस्तकगणो मम मङ्गलाय॥ ४४॥

95 नूपु०। जदि ईरिसो तुमं ता किंति णिअरूअं गोविअ चोरो विअ पविट्ठोसि।

---

91 यदीदृशं तत्किमपीमं निःशङ्को भूत्वा प्रक्ष्यामि। अये किमित्येतावन्ति मस्तकान्युदुह्यन्ते। किमिति वैकं रक्षित्वापराणि यत्र कुत्रापि न निक्षिप्यन्ते।

95 यदीदृशस्त्वं तत्किमिति निजरूपं गोपयित्वा चोर इव प्रविष्टोऽसि।

---

91. A. एरिसो. D. om. इमम्. A. B. D. G. om. भविअ. A. om. उपसृत्य। अए. A. B. इअन्ति. C. E. उहच्छहीअन्दि. A. ढूआन्ति. B. उव्वहीअदि. C.D.E.F.G. add उण before अवराइं. D. अत्त for जत्त. A. उण for वि ण. D. पा (?) for ण. A. णिक्खिअति. C. णिक्खिवव्यति. D. णिक्खिपान्ति. E. णिक्खिवसि.

92. D. शैलूषाधम for पाप & अस्मिन्स्थाने. A. अस्मत् for अस्थाने. B. मे after आवेदयसि. G. om. केवलम्. A. B. उपेक्ष्यसे. C. उपेक्ष्यम्.

93. A. om. अपि.

94. D. वरणे for च रणे. A. निकामम्.

95. A. om. त्ति. A. G. सङ्गोविअ. E. गोवइत्ता उण before चोरो.

96 रावणः। धिङ् मूर्ख न जानासि रे

ये चन्द्रचूडाचलचालनैक-
चातुर्यचिन्तामणयो भुजा मे।
तैरेव भूयिष्ठतरैः प्रविष्ट-
श्चापाधिरोपाय कथं न लज्जे ॥ ४५ ॥

तत्कथय कुत्र जानकीति।

97 मञ्जी०। अपवार्य सविषादम्।

यस्याः स्वयं कुलगुरुः किल याज्ञवल्क्य-
स्तातः स एष जनको जननी धरित्री।
साऽपि त्वमद्य बत दुर्विधिवैशसेन
वत्से निशाचरकराङ्कगता भवित्री ॥ ४६ ॥

98 नूपु०। अपवार्य। अलं संतावेण। कहं एत्तिअमेत्तम्मि वीरमण्डले कोवि णत्थि जो इमस्स हठप्पउत्तस्स पुरदो होदि।

99 मञ्जी०। निःश्वस्य। को नाम कुपितस्य दशकण्ठस्य संमुखो भवति क्षत्रिय ऋते सहस्रबाहोः कार्तवीर्यात्।

---

98 अलं संतापेन। कथमेतावन्मात्रे वीरमण्डले कोऽपि नास्ति योऽस्य हठप्रवृत्तस्य पुरतो भवति।

---

96. A. om. रे. A. B. D. G. प्रवृत्त for प्रविष्ट. B. om. इति after जानकी.

97. A. D. G. om. अपवार्य. D. बहु for बत; & दुर्विध. G. शैशवेन.

98. A. om. अपवार्य. B. C. E. F. G. तावेण. A. इयदि समेताम्मि. B. इयदि. E. एत्तिआति एतस्सिं. A. B. C. E. F. insert सो before को. A. B. अणत्थ for हठ. A. B. सम्मुहो. E. हविस्सदि.

99. A. विहस्य for निःश्वस्य, which C. E. F. G. om. C. D. E. F. G. om. को नाम. C. D. E. G. insert कः before संमुख. C. D. E. F. G. समुखे. B. क्षत्रियात्.

100 नूपु० । सहर्षम् । जीविदम्हि । पेक्ख पेक्ख । णं संपत्तो सहस्सबाहू किदवीरपुत्तो ।

101 मञ्जी० । धिङ् मूर्ख जामदग्न्यकुठारधाराजलनिमग्नः क्व संप्रति कार्तवीर्यः । तन्नूनमयं बाणासुरो भविष्यति । हन्त मोस्तादिदमनर्थान्तरम् । विमृश्य । अथवा विषस्य विषमौषधं भविष्यति ।

102 ततः प्रविशति बाणासुरः । परिक्रम्य साटोपम् ।

कैलासशैलशिखरादपि भूरिभारं
निःसीमसारमधुना धनुरिन्दुमौलेः ।
आलम्ब्य पुष्पसदृशं करपल्लवेन
स्फीतं भुजद्रुमवनं सफलीकरोमि ॥ ४७ ॥

103 रावणः । अनालोकितकेन । कथमद्यापि नानीयते जानकी ।

104 बाणः । विलोक्य स्वगतम् । कथमिह दशकण्ठोऽपि । प्रकाशम् । अहो एतावति वीरलोके न केनापि तावदारोपितमैश्वरं धनुः ।

105 मञ्जी० । नारोपणीयं च ।

---

100 जीवितोऽस्मि । प्रेक्षस्व प्रेक्षस्व । ननु संप्राप्तः सहस्रबाहुः कृतवीर्यपुत्रः ।

---

100. C. om. सहर्षम्. A. repeats जीविदम्हि. G. om. one पेक्ख. C. E. om. णं & G. ण. A. D. पउत्तो, B. पत्तो, C. E. संपत्तो, & G. पत्तो for संपत्तो.

101. A. B. °जले. D. om. जल. A. अत्रद्यम् for अयम्. B. भवति.

102. F. °सुरोऽसुरः A. D. G. सार for भार. A. G. भार for सार. G. सफलम्.

103. F. अनालोकितेन. G. अनाकर्णितकेन. A. एव after °केन. B. आः before कथम्. A. सीता.

104. C. E. F. आत्मगतम्. F. om. अपि. A. om. अहो.

105. G. नूपुरक for मञ्जीरक. D. om. च.

106 रावणः । अनाकर्णितकेन । कथमद्यापि नानीयते जानकी । तदयं चन्द्रहास एव मे बलादानेष्यति ।

107 बाणः । विहस्य । यदीदृशं वीरडम्बरं तत्किमारोप्यैव हरकार्मुकं नानीयते सीता ।

108 रावणः । आः कोऽयमलीकपण्डितः ।

उद्दण्डचण्डिमलसद्भुजदण्डखण्ड-
हेलाचलाचलहराचलचारुकीर्तेः ।
कीदृग्यशस्तुलितबालमृणालकाण्ड-
कोदण्डकर्षणकदर्थनयाऽनया मे ॥ ४८ ॥

109 बाणः । सोऽयमशक्तिप्रकारः ।

110 रावणः । आः कथंदशमुखस्याप्यशक्तिसभावना ।

111 बाणः । विहस्य । अये बहुमुखता नाम बहुप्रलापितायाः कारणम् । विक्रमस्य तु बहुबाहुतैव ।

112 रावणः । आः कथं रे पलालजालनिःसारेण भुजभारेण वीरंमन्योऽसि ।

113 बाणः । सक्रोधम् । अये समरकलाकुण्ठ दशकण्ठ कथं ममापि भुजभारं निःसारं व्यपदिशसि । न जानासि किं यतोऽत्रैव

---

106. G. om. अनाकर्णितकेन. All except A. read सीता. A. om. मे. C. E. F. मम. A. G. आनयति. D. om. 104 & 105.

107. C. E. F. इत्थम् for ईदृशम्. A. यदि तावदिदं श्रुतम् for यदीदृशम्. B. समारोप्य & जानकी.

108. C. E. विचालित & F. अवचालित for चलाच.

109. D. °प्रस्तारः.

111. F. om. विहस्य अये. D. °प्रलापिकायाः & विक्रम्य. C. D. E. F. G. om. तु.

112. B. om. आः. C. D. E. F. G. भार for जाल. D. om. भुजभारेण.

113. A. B. अरे for अये. A. D. G. om. कथम्. A. यत्र for अत्र.

पितुः पादाम्भोजप्रणतिरभसोत्सिक्तहृदयः
प्रयातः पातालं न कति कति वारानकरवम्।
सहस्रे बाहूनां क्षितिवलयमासज्य सकलं
गलन्नारोद्वेलां फणफलकमालां फणिपतेः ॥ ४९ ॥

114 रावणः। अरे बलितनय चलितनयवृत्तिरसि। यदलीकविक्रमवर्णनया सत्यविक्रमस्य मे पुरत आत्मानं विडम्बयसि।

115 बाणः। कथं त्वमेव सत्यविक्रमः।

116 रावणः। अथ किम्।

दोष्णां न मे विदितवानसि वीरलक्ष्मी-
प्रासादविभ्रमवतीं पदवीं गरिष्ठाम्।
ये चन्द्रशेखरगिरौ करपल्लवाङ्क-
पर्यङ्कशायिनि दधुः कलशप्रतिष्ठाम् ॥ ५० ॥

117 बाणः। अलमलीकवाग्विग्रहेण। तदिदं धनुरावयोस्तारतम्यं निरूपयिष्यति।

118 मञ्जी०। अये बाणरावणौ किमिदं नरवीरैकसमर्पणीयसीतापरिणयमनोरथेन विफलमायास्यते चेतःपदवी।

C. E. F. पाताले. G. जगत् for गलत्. A. फणी for फण. F. फणक for फलक.

114. F. अये for अरे. G. om. बलितनय. D. F. नयन for नय. C. E. F. मम. A. om. मे. All except B. have स्वात्मानम्.

115. A. B. om. एव.

116. A. °विभ्रमवताम् & om. वीम् ...ये. A. B. भ्रम for अङ्क. G. ° प्रतिष्ठान्.

117. A. D. om. वाग्. A. विस्तारेण A. B. add एव after धनुः & B. तावत् also.

118. A. °वीरौ कथं सम° & B. °वीरसम° D. विफलताम्.

119 बाणः। किमेतावता।

त्रिपुरमथनचापारोपणोत्कण्ठिता धी-
र्मम न जनकपुत्रीपाणिपद्मग्रहाय।
अपि तु बहलबाहुव्यूहनिर्व्यूहमाला-
बलपरिणतिहेलाताण्डवाडम्बराय॥ ११॥

120 रावणः।

उन्मूलितेन शिखरेण हराचलस्य
प्रागेव मे भुजबलस्य कृता परीक्षा।
एषा विदेहतनयाकुचकुम्भकेलि-
कौतूहलाद्गिरिशकार्मुककर्मदीक्षा॥ १२॥

121 नेपथ्ये।

असुरसुरनिशाचरोरगाणा-
मपि नरकिन्नरसिद्धचारणानाम्।
नमयति यदि कोऽपि चापमेत-
न्मम दुहितुः स करग्रहं करोतु॥ १३॥

122 रावणः।

रे रे भुजाः कुरुत चन्द्रकलाकिरीट-
कोदण्डकर्षणयशोधवलां त्रिलोकीम्।
अङ्गीकुरुध्वमचिराच्च विदेहपुत्री-
वक्षोजचन्दनरजःपरिधूसरत्वम्॥ १४॥

धनुरालोक्य स्वगतम्। अये दुर्विगाहमिदम्। तदलमनेन। प्रकाशम्।

---

119. A. बुद्धेः & B. बुद्धिः for °ता धीः. B. तु for न. A. B. D. F. G. परिमल for परिणति.

120. G. उन्मीलित. B. G. भुजव-नस्य. F. नर्म for कर्म.

121. A. करोति. G. तनोतु.

122. C. E. F. आत्मगतम्. A. रे B. अरे for अये which G. om. A. B. add इदम् after तावत् & read धनुरमे.

अये बाण त्वमेव तावदग्रे धनुरारोपय । अस्माकमपि नूतनागतत्वेन मान्योऽसि ।

123 बाणः । तथाऽस्तु । इति परिक्रामति ।

124 रावणः । स्वगतम् । अये हृदय अलं कातरतया । अयं तावत्कतरः कुण्ठीकृतदशकण्ठे शितिकण्ठकार्मुके ।

अन्योऽपि कोऽपि यदि चापमिदं विकृष्य
सीताकरग्रहविधिं विदधीत धीरः ।
लङ्कां नयामि च गिरानुनयामि चैनां
द्रागानयामि च वशे जनकेन्द्रपुत्रीम् ॥ ९१ ॥

125 मञ्जी० । सखे पश्य पश्य ।

बाणस्य बाहुशिखरैः परिपीड्यमानं
नेदं धनुश्चलति किंचिदपीन्दुमौलेः ।
कामातुरस्य वचसामिव संविधानै-
रभ्यर्थितं प्रकृतिचारु मनः सतीनाम् ॥ ९६ ॥

126 रावणः । सविषादमात्मगतम् । कथमियं सीतानुनयप्रत्यूहपिशुनेव दुरुपश्रुतिः । प्रकाशम् । अये बाण अपि नाम ते पललजालनिःसारो भुजभारः ।

127 बाणः । कथं भुजमण्डलमिदमालोकयन्नपि कटुभाषितां न मुञ्चसि ।

---

123. D. परिक्रमति.

124. C. E. F. आत्मगतम्. G. अरे for अये. F. repeats अलं कातरतया. D. कातरः. B. कुण्ठित. A. अतिकठोर & B. हर for शितिकण्ठ. A. D. G. इमम् for इदम्. A. विदधेत & F. विदधाति. A. B. C. E. F. वीर for धीर. D. एताम्. B. वशम्.

125. A. G. om. one पश्य. D. अपि for इव.

126. A. B. एव for इव. A. om. ते. B. adds भार after जाल for which C. D. E. F. G. read. भार.

127. D. अये नरपराङ्मुख दशमुख कथमिदं भुजवनम् for कथम्...इदम्. C. E. F. आलोक्य. A कटुक. A. B. °भाषितानि.

128 रावणः। तत्किमनेन करिष्यसि।

129 बाणः। यत्कृतं हैहयराजेन।

130 रावणः। इदमहं ते भुजवनं निजप्रतापानलेन निर्दहामि।

131 बाणः। इममहं त्वत्प्रतापानलमनेकरुचिरचापचुम्बितनिजबाहुबलाहकनिर्मुक्तनाराचधारासारैः शमयामि।

132 रावणः।

रे बाण मुञ्च मयि बाणशतानि पञ्च
नन्वस्ति मे करतले करवालवल्ली।
रे पञ्चबाण विवृणु त्वमपि स्वबाणा-
न्नन्वेति सा युवतिलोकललामवल्ली॥ ९७॥

133 नूपु०। अए बाणरावणाओ सअं जेव्व अप्पाणं वण्णन्ता ण लज्जेथ।

134 रावणः। धिङ् मूर्ख कथमात्मनैव श्लाघनीयो दशकण्ठः। ननु रे

मन्दोदरीकुटिलकोमलकेशपाश-
मन्दारदाममकरन्दरसं पिबन्तः।

---

133 अये बाणरावणौ स्वयमेवात्मानं वर्णयन्तौ न लज्जेथे।

---

128. D. विहस्य. A. B. om. तत्.

129. B. हैहयेन.

130. A. B. G. असौ for अहम्. B. om. निज. B. D. G. °अनले.

131. A. F. G. इदम् for इमम्. B. om. निज. A. B. D. add निवह after बलाहक.

132. C. D. E. अन्वेति for नन्वेति. F. कोक for लोक.

133. B. अयि. D. अप्पा अप्पाणअ (?) after जेव्व. B. डुण्वन्ता. E. वण्णअन्दौ.

134. B. आत्म (नै?) व & A. C. E. F. G. आत्मैक. A. श्लाघमान & G. श्लाघ्य. A. B. भार for पाश. D. तर्कयन्ति.

वीणानिनादमधुरध्वनिमुद्गिरन्तो
मद्विक्रमं मधुकरा अपि कीर्तयन्ति ॥ ५८ ॥

135 बाणः । कथमयं सुरतरुकुसुमदामकमनीयकामिनीजनोपभोगसौभाग्यं विभावयति । तदिदानीम्

अमी मे दोर्दण्डास्तुलितहरशैलैकशिखरा-
स्तुरासाहं साहंकृतिकरतलन्यस्तकुलिशम् ।
पराभूय स्वैरं त्रिदशवनमुन्मूल्य सकलं
मम क्रीडोद्यानं सुरतरुमनोज्ञं विदधतु ॥ ५९ ॥

इति निष्क्रान्तः ।

136 रावणः । कथमयं निर्गतः । अहं तु

अनाहृत्य हठात्सीतां नान्यतो गन्तुमुत्सहे ।
न शृणोमि यदि क्रूरमाक्रन्दमनुजीविनः ॥ ६० ॥

137 मञ्जी० । वत्से जानकि अधुना दैवैकरक्षणीयासि ।

138 रावणः । कर्णं दत्त्वा । अये कस्यायमाक्रन्दः श्रूयते । नभसि निपुणं निरूप्य । नूनमनेन कस्यचिन्नाराचपीडितेन कठोरमाक्रन्दता गगनपथचारिणा मारीचेन भवितव्यम् । तदेनमाश्वासयामि तावत् ।

इति निष्क्रान्तः ।

---

135. C. E. F. om. बाण. C. D. E. F. G. विडम्बयति. B. ते & E. मत् for मे. F. आस्थान for उद्यान.

136. B. उपजीविनाम्.

137. A. G. देव. B. दैवेन.

138. G. includes नभसि in the speech. A. B. परि & C. F. नि before पीडित. A. गमन for गगन. A. D. सारिणा for चारिणा. All except G. add गच्छता (& B. गच्छता च) after मारीचेन.

139 नूपु० । सहर्षम् । वअस्स दिट्ठिआ वग्घस्स मुहादो कुरङ्गीव्व इमस्स हत्थादो उव्वरिदा जाणई ।

140 मञ्जी० । सखे एवमेतत् । तदेहि । वृत्तान्तमिमं जनकराजस्य निवेदयावः ।

इति निष्क्रान्ताः सर्वे ।

प्रथमोऽङ्कः ।

---

139 वयस्य दिष्ट्या व्याघ्रस्य मुखात्कुरङ्गीवास्य हस्तादुर्वरिता जानकी ।

---

139. G. om. सहर्षम्. All except B. have विअ after वग्घस्स. A. C. D. E. F. om. व्व. A. B. उग्गदा.

140. F. एव for एतत्. B. C. एनम् & E. एतम्. F. जनकस्य. A. B. निवेदयामो जनकराजस्य. After सर्वे B. E. read thus:—इति श्रीजयदेवविरचिते (E. कृतौ) प्रसन्नराघवनाम्नि (E. °आख्ये महा) नाटके; & F. thus:—इति श्रीप्रसन्नराघवनाटके प्रथमोऽङ्कः पर्याप्तः.

॥ द्वितीयोऽङ्कः ॥

। ततः प्रविशति तापसः ।

1 तापसः । समन्तादवलोक्य । अहो अयमनेकशुकशावकानुगमानिकामश्यामलहरितलतावितानमनोरमारामरमणीयसंनिवेशः प्रदेशः । नेपथ्याभिमुखमवलोक्य । कथमयं भिक्षुः । भिक्षो इत इतः ।

2 प्रविश्य भिक्षुः । अपि कुशलं तापसस्य ।

3 तापसः । क्षेममस्माकम् । इदानीं विशेषतो भवद्दर्शनात् । पुनः सप्रणयम् । भिक्षो ननु कीटवन्महीपर्यटनेन श्रान्तो भवान् । तदिह मिथिलायां पञ्चरात्रनिवासेन श्रमोऽपनेतव्यः । प्रसङ्गादयं च जनको राजा द्रष्टव्यः ।

4 भिक्षुः । किमस्माकं निरीहाणां राजदर्शनेन ।

5 तापसः । नूनमयं ब्रह्मविद्याविनोदशीलः खलु सीरध्वजः । तेन द्रष्टुमुचित एव भवादृशाम् ।

6 भिक्षुः । अये राजापि ब्रह्मविद्यावानिति सत्यमेतत् ।

---

1. A. C. D. E. F. om. तापस. A. विलोक्य. B. अये for अहो. A. om. अयम्. G. om. श्यामल. A. B. om. हरित for which D. G. have हरित्. A. om. वितान for which B. has नितान्त. D. रमणीयः. B. °वेशविशेषः. D. G. °वेशप्रदेशः. C. D. E. F. अदूरे after भिक्षुः. A. om. भिक्षो & ततः for second इतः.

2. A. om. भिक्षुः.

3. C. D. E. F. G. read thus :— ता० । क्षेममस्माकं युष्माकं च कुशलम् । भि० । इदा...दर्शनात् । ता० । पुनः &c. D. G. om. भिक्षो before ननु A. om. मही. D. तदीह. C. E. जनकोऽपि राजा, D. जनकराजोऽपि, & F. जनकराजापि for च... नको.

4. A. नृप for राज.

5. D. om. विद्या. G. कुशल for शील. A. B. उचितम्.

6. B. om. अपि. D. विद्वान् after विद्या. F. om. इति.

7 तापसः । भिक्षो सत्यमेतत् । देवस्य दशकण्ठ— । इत्यर्धोक्ते । देवस्य शितिकण्ठस्याज्ञा ।

8 भिक्षुः । विहस्य । अलमपलापेन । विदितं मया राक्षसः खलु भवान् । तत्कथय विश्रब्धं को भवानिति । अहमपि भवादृश एव कोऽपि ।

9 तापसः । तदाकर्ण्यताम् । अहं सकलमन्त्रिमुकुटमाल्येन माल्यवता प्रहितस्ताटकावनम् । आकर्णितं हि तेन यत्किल कोऽपि कौशिको नाम मुनी राजानमयोध्यापतिमेत्य स्वमखरक्षणाय तस्य रामनामानं तनयं सानुजं याचितवान् । तेन चावश्यं माननीयो मुनिरिति निजनयनाभ्यामपि प्रियतमौ निजतनयौ तस्य समर्पितौ ।

10 भिक्षुः । ततस्ततः ।

11 तापसः । ततस्तेन मुनिना पारितोषिकं ताटङ्कयुगलमर्पितं तस्य राज्ञः । उक्तं च । राजन् दिव्यमिदं ताटङ्कयुगलम् ।

तदिदं वीरसूकर्णनिवेशोचितमित्यसौ ।
अन्तःस्फुरन्ती रत्नानां वर्णमालेव शंसति ॥ १ ॥

---

7. A. om. भिक्षो. A. D. G. दश & B. दशकण्ठस्य. C. उक्तेः & F. उक्तौ.

8. D. तापसः for भिक्षुः. A. om. विहस्य. B. C. E. F. G. put तत्... इति in the mouth of the तापस. B. om. इति after भवान्. All except A. put अहम् ... अपि in the mouth of the भिक्षु. B. F. om. एव. B. G. add राक्षसः after कोऽपि.

9. A. om. तापसः & च for हि. C. E. F. om. कोऽपि for which D. has किमपि. A. कौशिकनामा. C. E. F. °याचितवान्सानुजम्. A. °तमः, °तनयः, °र्पितः. D. om. तस्य.

11. D. °युगम्. A. B. D. समर्पितम् which B. puts after तस्य राज्ञः. A. om. तस्य राज्ञः. E. तस्मै राज्ञे. F. अस्य राज्ञः. A. B. स राजोक्तश्च. B. इदं दिव्यताटङ्कयुगलम् after राजन्. C. F. इति after युगलम्. A. has not °सूकर्णनिवेशो°. D. E. F. इव for

तेन कौसल्याकर्णयोर्निवेशनीयमिति। अनुमतं च राज्ञा। राजकुमारद्वयानुगतेन निजाश्रमपदं प्रति गतं च मुनिना।

12 भिक्षुः। ततस्ततः।

13 तापसः। तत इदमाकर्ण्य तत्ताटङ्कयुगलं लङ्केश्वरजनन्या निकषाया एव कर्णोचितमिति विचिन्त्य तदाहरणाय पूर्वमेव ताटकां प्रति निजानुचर एकः प्रस्थापितः। अधुना च नूनं ताटकया तत्ताटङ्कयुगलमाहृतमिति विचार्य तदानयनाय ताटकां प्रत्यहं प्रहितः।

14 भिक्षुः। कथं पुनरिदं वृत्तान्तजातमाकर्णितं माल्यवता।

15 तापसः।

वार्ता च कौतुकवती विमला च विद्या
लोकोत्तरः परिमलश्च कुरङ्गनाभेः।
तैलस्य बिन्दुरिव वारिणि दुर्निवार-
मेतत्त्रयं प्रसरति स्वयमेव लोके ॥ २ ॥

131 शता० । किमेतावता । अतिगम्भीरभुजसारकासारकैरवारामः खलु रामः ।

132 विश्वा० । राजर्षे के पुनरमी परितः स्फुरन्मणिमौलयः परःसहस्रा दृश्यन्ते ।

133 जनकः ।

श्रीकण्ठकार्मुकनिरस्तभुजावलेपा
नानादिगन्तजगतीपतयः किलामी ।
अभ्यर्थनां मम किमप्यनुवर्तमाना
गृह्णन्ति कानिचिदहानि नरेन्द्रपूजाम् ॥ ४० ॥

134 विश्वा० । वत्स राम तदेषामेव पश्यतां कौतुकमस्माकं पूरय ।

---

127. D. om. असौ.
128. D. येन for तेन. A. C. E. F. भाषसे. A. B. मुच्यताम्.
129. F. om. मुनिः.
130. B. अग्नि. D. G. स्फुलिङ्ग.
131. A. om. सार & खलु रामः.
132. D. इतः for अमी & om. परितः for which A. स्फुरन्तः. D. om. मणि. A. अन्ये, D. परःसहस्रम्, & F. °हस्राम्.
133. A. अभ्यर्थनम्. B. G. अभिवर्त°.
134. G. रामभद्र. A. यत् for तत्.

135 रामः । विश्वामित्रं प्रणम्य निष्क्रान्तः ।

136 जनकः । आङ्गिरस अपरिशीलितसंनिवेशस्य वत्सरामस्य भवता प्रत्यनन्तरीभूयताम् । आदिश्यतां च कञ्चुकी करकलितकमलमालाया जानक्याः स्वयंवराङ्गणावतरणाय ।

137 शता० । तथास्तु । इति निष्क्रान्तः ।

138 प्रविश्य कञ्चुकी । जयतु जयतु देवः । अनुष्ठित एव देवादेशः ।

139 विश्वा० । विलोक्य सहर्षम् । कथमुद्धतमेव रामभद्रयशःपताकाकेतुदण्डेन हरकोदण्डेन । पुनः सविस्मयम् । अये

राघवेण शिशुनापि किलायं
लीलयैव नमितो हरचापः ।
दूरमुल्लसति यस्य समन्ता-
दम्बरेऽपि गमितो गुणघोषः ॥ ४१ ॥

140 लक्ष्मणः । भगवन् एवमेतत् । तथा हि

पूर्णा एव पुरारिचापकपटच्छन्नाचलग्रामणी-
गूढानेकगुहागभीरकुहरस्फारप्रतिध्वानिनीः ।
मौर्वीभूतभुजङ्गराजवदनश्रेणीविसर्पद्वचः-
प्रारब्धारियशःप्रशस्तिसहितैर्ज्याघातघोषैर्दिशः ॥ ४२ ॥

---

135. F. मुनिम्.

136. D. अपरिचितनिवेशनस्य & om. भवता. F. om. च which D. G. put after कञ्चुकी. A. om. कञ्चुकी ...नक्याः. F. °मालया. C. E. F. वीरस्वयं°. A. om. अङ्गण.

137. D. om. अस्तु.

138. B. om. प्रविश्य. A. B. om. जय ... देवः. C. जय जय देव. D. G. om. जयतु.

139. D. G. आः before कथम्. A. उद्धृत. A. D. G. रामचन्द्र. D. मण्डलेन for दण्डेन. A. C. E. om. हरकोदण्डेन after which D. सह. B. अद्य for अपि.

140. C. स्वान for स्फार. B. G. सदृशैः for सहितैः.

141 जनकः । किमुच्यते दिशः पूर्णा इति । ननु

एतैः श्रीकण्ठकोदण्डचञ्चन्मौर्वीभवै रवैः ।
चिरात्प्रतिज्ञया सार्कं पूर्णो मम मनोरथः ॥ ४३ ॥

142 प्रती० । कञ्चुकिनं प्रति । अज्ज पेक्ख पेक्ख कोदूहलम् । सीतारामेहिं मिलिअ उण हरचावरोवणं समग्गीकरीअदि ।

143 कञ्चुकी । सकौतुकम् । कथमिव । विमृश्य विहस्य च । आ ज्ञातम् ।

करकिसलयलीलाचारुचण्डीशचापे
दशरथतनयेन स्वैरमाकृष्यमाणे ।
रभसरसविकासी सीतया पुङ्खितोऽसौ
कुवलयदलदामश्यामकान्तिः कटाक्षः ॥ ४४ ॥

144 लक्ष्मणः । भगवन् अत्यद्भुतं वर्तते । नन्वयम्

भिन्दन्निद्रां मुरारेः सकलभुजभृतां चालयञ्शौर्यदर्पं
छिन्दन्दिक्कुम्भिकर्णाञ्चलचलनकलां कम्पयन्कूर्मराजम् ।
आर्यश्लाघागभीरः प्रलयजलधरध्वानधिक्कारधीर-
ष्टङ्कारः कृष्यमाणत्रिपुरहरधनुर्भङ्गभूराविरास्ते ॥ ४५ ॥

---

142 आर्य प्रेक्षस्व प्रेक्षस्व कौतूहलम् । सीतारामाभ्यां मिलित्वा पुनर्हरचापारोपणं समग्रीक्रियते ।

---

141. A. B. G. आः before किम्. A. B. इदमालप्यते for उच्यते. D. तथा before ननु & स्वरैः for रवैः. C. E. F. मम पूर्णो.

142. D. om. कञ्चुकिनं प्रति. A. om. पेक्ख. D. °कडक्खेहिं for °रामेहिं & °रोवणसामग्गी.

143. C. E. om. च. A. B. om. आ. A. सरभसमावि°. G. रससरसवि°. A. प्रोषित for पुङ्खित. A. D. अयम् for असौ.

144. A. स्वापयन् शौर्यवृत्तीम्. G. म्लानयन्. C. E. F. °वलन° for °चलन°. A. B. D. G. अस्ति for आस्ते.

145 प्रती० ।

तेल्लोक्कं लङ्घन्तो गिरिगहिरगुहामुत्तगज्जन्तसिंह-
प्फारुम्मिल्लन्तकण्ठत्थणिदपडिरवुग्गारपूरिज्जमाणे ।
बम्हण्डे भज्जमाणे कडुविहडकडक्कारपब्भारभीमो
अम्मो भज्जन्तचण्डीसरधणुट्टणक्कारओ उग्गमेइ ॥ ४६ ॥

146 कञ्चुकी । पश्य कौतुकम् ।

क्रीडाभग्नमृगाङ्कमौलिधनुषं सीतार्पितां वक्षसा
बिभ्राणं कमलस्रजं निजगृहं शृङ्गारवीरश्रियोः ।
रामं व्रीडवशादवाञ्चितमुखं भूमीभुजां पश्यतां
चेतः क्रोधविषादविस्मयमुदामूर्मिः समालिङ्गति ॥ ४७ ॥

147 प्रविश्य शतानन्दः । राजर्षे विषीद वा प्रसीद वा । इदं यथादृष्टमुपवर्ण्यते ।

ज्यावल्लीं ललिताङ्गुलीकिसलयैराकर्णमाकर्षतो
न भ्रूभङ्गुरतां गता रघुशिशोर्भग्नं धनुर्धूर्जटेः ।

---

145 त्रैलोक्यं लङ्घयन् गिरिगभीरगुहासुप्तगर्जत्सिंह-
स्फारोन्मीलत्कण्ठस्तनितप्रतिरवोद्गारपूर्यमाणे ।
ब्रह्माण्डे भज्यमाने कटुविघटकडक्कारप्राग्भारभीमः
अहो भज्यमानचण्डीश्वरधनुष्टणत्कारक उद्गच्छति ॥

---

145. B. D. तिल्लोक्कम. E. कुहर for गहिर. A. G. जग्गन्त. D. बहु for कडु. A. विघण & G. विडअ for विहड. F. ठणक्कार. A. कणक्कार & B. F. रणक्कार. D. डंडं भमेइ for °ओ उग्गमेइ.

146. D. परमम् for पश्य. C. E. F. पश्य पश्य कौतूहलम्. A. B. भूमिम् & D. ऊर्मीः for ऊर्मिः.

147. A. om. प्रविश्य. A. B. om. इदम्. D. तु before यथा°. A. अ-

नाहङ्कारतरङ्गितो ध्वनिरभूत्कण्ठेऽस्य दीर्यद्धनु-
ष्टङ्कारस्तु चकार तारतरलः शब्दाद्वितीयं जगत् ॥ ४८ ॥

148 जनकः । कथं पुनरेतावतीमतिभूमिमवगाहमानोऽपि वत्सो भवता न निवारितः ।

149 शता० । कथंकारं वारयामः ।

यावत्कन्दुकलाञ्छनाङ्कितकरः शोणाब्जनालाकृतिः
कौसल्यार्पितमङ्गलप्रतिसरो वत्सस्य दोःकन्दलः ।
किञ्चिच्चञ्चति तावदेव हि दलच्चण्डीशचापोच्छल-
च्छब्दैकार्णवमग्नमेतदखिलं जातं त्रिलोकीतलम् ॥ ४९ ॥

150 जनकः । तदलं कालातिपातेन । याच्यतामनुमतिर्भगवतो विश्वामित्रस्य जानकीरामभद्रयोः पाणिसंघट्टनाय ।

151 शता० ।

सन्धौ विघट्टमानेन धनुषैव पिनाकिनः ।
ननु संघट्टितौ पाणी जानकीरामभद्रयोः ॥ ५० ॥

तदूर्मिलालक्ष्मणयोरेव पाणिसंघट्टनाय भगवानभ्यर्थनीयः ।

स्मर्दीयम् & B. अस्य शीर्यत्. A. C. E. F. शब्दद्वितीयम्.

148. All except D. G. om. पुनः. C. E. F. °लम्बमान. A. C. E. om. अपि. A. B. रामचन्द्रः & G. रामभद्रः after वत्सः. All except D. G. put अपि after भवता. D. om. न.

149. D. वारयामि. B. G. अञ्चित. C. E. F. रामस्य for वत्सस्य. A. चलत् for दलत् & त्रिलोकीमयम्.

150. All except G. put तत् before याच्यताम्. B. C. वाच्यताम् A. मतिः only.

151. A. B. सम्यक् & D. G. सद्यः for सन्धौ. A. B. सम् for नि. A. अपि for एव. D. एव after °घटनाय. A. B. स भगवान्.

152 विश्वा० । विहस्य । अस्त्वेतत् । परं तु

पाणीञ्जनककन्यानां पीडयद्भिः सहानुजैः ।
सीताया रामभद्रो मे पाणिपीडनमिच्छति ॥ ९१ ॥

153 जनकः । सहर्षम् । कथं माण्डवीश्रुतकीर्तिभ्यां भरतशत्रुघ्नयोरपि परिणयमनुसन्धत्ते भगवान् ।

154 विश्वा० । अथ किम् ।

155 जनकः । तद्गृहीतमिदमधिशेखरमाज्ञाकुसुमं भगवतः । तदागच्छत । समीहितं निष्पादयामः ।

इति निष्क्रान्ताः सर्वे ।

तृतीयोऽङ्कः ।

---

152. A. om. परं तु. B. om. तु. C. F. सीतया. D. पाणिग्रहणम्.

153. A. om. कथम्. A. C. E. F. om. अपि. C. E. F. अभि for अनु.

155. A. B. put इदम् after °शिखरम्. B. संपादयामः for तद्...यामः. A. C. E. F. तदेहि. D. तदागच्छ. A. समीहितोपसंपदं पादयामः for समी...यामः.

॥ चतुर्थोऽङ्कः ॥

1 नेपथ्ये ध्रुवा गीयते ।

मणिमअमङ्गलदीवो जणअणरेन्दस्स मण्डवे जलइ ।
चण्डानिलोवि पत्तो जंसि विहलागमो होइ ॥ १ ॥

2 पुनर्नेपथ्ये ।

अरे क्षत्रिया अपसरत लोचनपथात् । नन्वयम्
कुर्वन्कोपादुदञ्चद्रविकिरणसटापाटलैर्दृष्टिपातै-
रद्यापि क्षत्रकण्ठच्युतरुधिरसरितिसिक्तधारं कुठारम् ।
तीव्रैर्निश्वासवातैः पुनरपि भुवनोत्पातमासूचयद्भि-
र्गर्जन्मौर्वीकचापस्त्रिभुवनविजयी जामदग्न्यः समेति ॥ २ ॥

ततः प्रविशति जामदग्न्यः ।

3 जामदग्न्यः । साटोपं परिक्रम्य । अहो धृष्टता जनकस्य यदयं हरचापारोपणेन कन्यादानं प्रतिजानीते । परशुं विलोक्य ।

सकलनृपकठोरकण्ठपीठी-
बहलगलद्रुधिरौघधौतधारः ।

---

1 मणिमयमङ्गलदीपो जनकनरेन्द्रस्य मण्डपे ज्वलति ।
चण्डानिलोऽपि प्राप्तो यस्मिन्विफलागमो भवति ॥

---

1. A. B. मङ्गलध्रुवा. D. पउत्तो for वि पत्तो.

2. A. क्षत्रिय अपसर. A. B. G. पातैः & D. पीनैः for वातैः. A. सूत्रयद्भिः. A. मौर्वीश & F. मौर्वैक. A. °विजयी.

3. All except A. om. जामदग्न्यः. D. अवलोकय. A. D. °कण्ठपाटी. A. घोर for धौत & पतितः for क्व-

तदिदमजनकं जगद्विधत्ते

परशुरयं जमदग्निनन्दनस्य ॥ ३ ॥

विमृश्य ।

उदितोऽर्जुनभुजविपिने ज्वलितस्तुङ्गेषु नृपतिवंशेषु ।

निमिकुलकलमपलालं कोपानल किं पुनः स्पृशसि ॥ ४ ॥

पुनर्विचिन्त्य । अथ वालमस्मिन्नुपेक्षया । मनोरथोपनीतजामातृभुजबलावलेपदुर्ललितः खल्वसौ । तथा हि संदिष्टमनेनास्मत्परशोः । त्वं मित्रमित्यादि पठति । अहो अस्य दुरवलेपः ।

यस्योद्यद्घोरधाराञ्चलदलितगलद्बहुशाखासहस्र-

प्रोद्यच्छद्रक्तधारानिवहजितनरोन्मीलदर्कांशुजालः ।

क्ष्मापालः कार्तवीर्यः सुरपुरसुदृशां पुष्पिताशोकशाखि-

भ्रान्तिं दत्त्वापि चित्ते निजपुरसुदृशां शोकशाखीबभूव ॥ ५ ॥

अपि च ।

येनाबध्यत नर्मदाम्बुनिवहः सङ्ख्ये च लङ्केश्वर-

स्तद्यस्मिन्निरमज्जदर्जुनभुजक्षोणीरुहां मण्डलम् ।

क्षत्रस्त्रीनयनाम्बुपूरमिषतः खेलन्ति यत्केलय-

स्तत्तादृक्परशुर्ममायमधुना धाराजलं मुञ्चति ॥ ६ ॥

विलोक्य । कथमयं शतानन्दशिष्यस्ताण्ड्यायनः ।

लितः. D. G. °कमल° & G. °कला-पम्. A. °नलः...स्पृशति. A. विमृश्य. D. G. om. अथ वा. A. अवलेपात्. G. अयम् for असौ. D. om. तथा हि. A. मम after मित्रम्. B. om. आदि. F. पूर्वाङ्कस्थम् before पठति. A. हति for जित. C. E. F. अन्यच्च for अपि च which D. om. F. कीर्तयः for केलयः.

4 प्रविश्य ताण्ड्यायनः । भगवन् अभिवादये ।

5 जाम० । आयुष्मान् भूयाः । कथय तावदपिनाम भवदुपाध्याययजमानस्य निवृत्ता हरचापारोपणश्रद्धा ।

6 ताण्ड्या० । निवृत्ता ।

7 जाम० । सहर्षम् । निवृत्ता ।

8 ताण्ड्या० । भगवन् निवृत्ता सहैव चापेन ।

9 जाम० । ससंभ्रमम् । किमात्थ सहैव चापेन निवृत्तेति ।

10 ताण्ड्या० । अथ किम् ।

11 जाम० । स्फुटं तावत्कथय किं वृत्तमिति ।

12 ताण्ड्या० । कस्यचित्

अखण्डचण्डिमोद्दण्डभुजदण्डनिपीडितम् ।
भगवन् भृगुमार्तण्ड भग्नं भर्गशरासनम् ॥ ७ ॥

13 जाम० । सक्रोधम् । कस्य ।

14 ताण्ड्या० ।

सुबाहुमारीचपुरःसरा अमी
निशाचराः कौशिकयज्ञघातिनः ।
वशे स्थिता यस्य—

---

4. A. B. D. om. प्रविश्य.

5. C. om. जामदग्न्यः. A. B. अये before आयु°. C. E. F. तव for भवत्.

6. D. om. this speech and the next.

8. A. B. किन्तु after निवृत्ता. A. हरचापेन सह. B. इति after चापेन.

9. A. रे किमात्थ रे, B. रे किमात्थ, & F. रे after किमात्थ. A. हरचापेन.

11. G. कथय तावत्. A. om. 11 & 12.

13. B. सरोषम्.

15 जाम० । सक्रोधम् । अलमतः परम् । ज्ञातः खलु खलानामग्रणीर्निशाचरग्रामणीः ।

16 ताण्ड्या० । स्वगतम् । कथं दशकण्ठेन धनुर्भग्नमिति ज्ञातं भगवता । भवतु तावत् ।

17 जाम० । सक्रोधम् । अयमयमिदानीम्

नृपशतसुकुमारकण्ठनाली-
दलनकलाकुशलः परश्वधो मे ।
दशवदनकठोरकण्ठपीठी-
कदनविनोदविदग्धतां दधातु ॥ ८ ॥

विमृश्य । अथ वा

यः कृत्वार्जुनभूरुहाद्भुतभुजाशाखासहस्रच्छिदां
दम्भोलेर्गिरिकूटपाटनपटोः शौण्डीर्यतो लज्जते ।
तस्यैतस्य परेतराजसदनद्वारः कुठारस्य मे
का श्लाघा दशकण्ठकण्ठकदलीकाण्डावलीखण्डने ॥ ९ ॥

पुनर्विमृश्य । तथाप्यनुचितमुदासितुमेतस्मिन्कृतागसि रक्षसि । तदिदानीम्

---

15. All except A. B. om. सक्रोधम्. D. खलामणीः.

16. A. B. भगवता प्रतीतम् which G. transposes. C. D. E. F. om. भवतु तावत्. B. भग्नं तु before तावत्.

17. B. कल for शत. C. कदन for दलन. D. पाटी for पीठी. A. दधाति. A. B. G. कर्ता for कृत्वा. D. शौण्डीर्यमालम्बते. B. छेदने for खण्डने. All except B. have विचिन्त्य. A. om. उदासितुम्. A. B. अस्मिन्.

दक्षिणस्याम्बुधेर्मध्ये कृत्वा कोङ्कणमष्टमम् ।
मद्बाणजन्मा दहनो लङ्कातङ्काय जायताम् ॥ १० ॥

इति साटोपं परिक्रामति ।

18 ताण्ड्या० । स्वगतम् । दिष्ट्या स्वस्ति क्षात्रियकुलाय ।

19 नेपथ्ये । अहो नियोगिनः कृतविवाहमङ्गलयोः सीतारामचन्द्रयोः स्वस्तिवाचनिका द्विजन्मान आहूयन्ताम् ।

20 जाम० । परिवृत्य सक्रोधम् । आः ब्रह्मबन्धो कथमलीकदशकण्ठकीर्तिदानेन प्रतारितोऽस्मि । नन्वयमन्यः कोऽपि जनकजामाता ।

21 ताण्ड्या० । भगवन् मम कोऽपराधः । अर्धोक्त एव भगवता भ्रान्तं संभ्रान्तं च ।

22 जाम० । तन्निःशेषं तावत्कथय ।

23 ताण्ड्या० ।

सुबाहुमारीचपुरःसरा अमी
निशाचराः कौशिकयज्ञघातिनः ।
वशे स्थिता यस्य शराग्रवर्तिनः
प्रतापलेशस्य गताः पराभवम् ॥ ११ ॥

तस्यैव । अखण्डचण्डिमेत्यादि पठति ।

---

18. A. B. om. स्वगतम्.

19. A. °रामयोः. D. °रामभद्रयोः. D. G. द्विजाः. A. आह्वयताम्.

20. D. om. परिवृत्य. B. सरोषम्. A. B. अलीकमेव. B. om. अयम्. A. B. D. एव after अन्यः. D. om. कोऽपि. A. जनकस्य.

21. G. वा after कः. A. भवता. B. G. मयापि after भ्रान्तम् & om. च. D. भ्रान्त्या भ्रान्तं च.

22. A. ननु शपेयं तत्कथय. B. ननु सविशेषम्. C. E. F. om. तत्.

23. A. B. D. G. do not repeat सुबाहु ...यस्य. B. G. तथा for तस्य.

24 जाम० । कः पुनरयं मारीचदमनः ।

25 ताण्ड्या० ।

ये ऋष्यशृङ्गचरुभागभुवः कुमाराः
संजज्ञिरे दशरथस्य वधूजनेन ।
तेषामयं निरुपमः प्रथमः कुमारो
रामाभिधः कुशिकराजतनूजाशिष्यः ॥ १२ ॥

26 जाम० । क्षणं विभाव्य सामर्षम् ।

दुर्धर्षाः सुरसिद्धकिन्नरनरैस्त्यक्तक्रमं वक्रतां
प्राप्ते यत्र विधातरीव तरसा तिस्रोऽपि दग्धाः पुरः ।
तद्भग्नं यदि राघवेण शिशुना चण्डीपतेः कार्मुकम्

27 ताण्ड्या० । स्वगतम् । किमधुना वक्ष्यति ।

28 जाम० ।

तन्मग्नं कुलमेव तर्कय रघोर्मच्छस्त्रधाराम्भसि ॥ १३ ॥

29 ताण्ड्या० । संरब्धोऽयं भगवान् । तदिमं वृत्तान्तमुपाध्यायस्य कथयामि ।

इति निष्क्रान्तः ।

30 जाम० । विलोक्य । अभिनवविवाहमङ्गलतया तर्कयामि स एष रामः सहानुज इति । सहर्षं निर्वर्ण्य । अर्धमुग्धः खल्वयं जनो यदेनं काम इति वक्तव्ये राम इति जल्पति । पुनर्निर्वर्ण्य ।

---

25. A. बन्धुजनेभ्यः.
26. F. दुर्धर्षं. B. सिंह for सिद्ध. A. विधातुरिद्ध.
27. A. वक्ष्यते.
29. All except B. G. om. अयम्. A. B. खलु before भगवान्. G. तमिमम्. A. तदिदम्. A. B. वृत्तान्तजातम्.
30. A. D. G. सानुजः. A. om. इति & adds अये before अर्ध° ; येने-

सौन्दर्यं मदनादपि प्रथयति प्रौढिप्रकर्षं पुरां
भेत्तारं मदनारिमप्यधरयत्युद्दामदोःक्रीडितम् ।
मुग्धत्वं मदनारिमौलिशशिनोऽप्युत्कर्षमालम्बते
मूर्तैस्तत्किमसौ रसैर्विरचितः शृङ्गारवीराद्भुतैः ॥ १४ ॥

ततः प्रविशतो रामलक्ष्मणौ ।

31 लक्ष्मणः । सकौतुकम् ।

मौर्वीं धनुस्तनुरियं च बिभर्ति मौञ्जीं
बाणाः कुशाश्च विलसन्ति करे शिताग्राः ।
धारोज्ज्वलः परशुरेष कमण्डलुश्च
तद्वीरशान्तरसयोः किमयं विवर्तः ॥ १५ ॥

आर्य किं पुनरिदमग्रे ब्रह्मक्षत्रात्मकं चित्रमिव स्फुरति ।

32 रामः । वत्स न विदितं ते । नन्वयं स भगवान्भार्गवः

वेध्यं क्रौञ्चमहीधरस्य शिखरं देयं धरित्रीतलं
प्रत्यग्रक्षितिखण्डदण्डनविधिक्रीडाविधेयोऽम्बुधिः ।
जेयस्तारकसूदनो युधि करक्रीडत्कुठारस्य च
च्छेद्यं यस्य बभूव हैहयपतेरुद्दामदोःकाननम् ॥ १६ ॥

वम् ; om. सौन्दर्यः...प्र ; & has भयति for °थयति. B. D. प्रौढ. C. E. मूर्तिः & विरचिता. A. B. तैः for तत्.

31. C. E. F. विलोक्य before सविस्मयम्. D. मौञ्जी. A. विकसन्ति. G. सितायाः. B. विपाकः & D. G. विकारः for विवर्तः. D. अयम् for इवम्. D. G. om. अग्रे for which C. has अये & which E. F. put after °त्मकम्. F. किम् before ब्रह्म°. A. adds कर्म & B. D. G. वर्ण after क्षत्र.

32. A. D. om. स. F. °विधेयाम्बुधेः. A. B. D. G. क्रीडा for क्रीडत्.

33 लक्ष्मणः। तर्हि विस्मयनीयशीलोऽयं भगवान्।

34 रामः। विस्मयनीयशीलानां शिखामणिरिति वक्तव्यम्। अयं हि

एकः स्वर्णमहीधरां क्षितिमिमां स्वर्णैकशृङ्गीं यथा
गामेकां प्रतिपाद्य कश्यपमुनौ न स्वात्मने श्लाघते।
किंच क्रौञ्चगिरिं गिरीशतनयव्याविद्धशक्तिक्षतं
विद्ध्वा बाणगणैरुदात्तहृदयो वैलक्ष्यमालम्बते॥ १७॥

उभौ परिक्रामतः।

35 रामः। अञ्जलिं बद्ध्वा। भगवन् भृगुकुलशिरःशेखरशिखण्डक एष सानुजस्य मे परमोन्नतिरमणीयपरिणामः प्रणामः।

36 जाम॰। समरविजयी भूयाः।

37 रामः। भगवन् भृगुकुलमौलिमाणिक्य अनुगृहीतोऽस्मि।

38 जाम॰। स्वगतं सकरुणम्।

रामे चन्द्राभिरामे विनयवति शिशौ किं प्रकुप्यातिमात्रं

विमृश्य सक्रोधम्।

हुं चापं चन्द्रमौलेश्चपलमतिरसाद्विक्षुभङ्गं बभञ्ज।

---

34. A. विस्मयशीलानाम् & om. हि. A. हेम & B. हैम for स्वर्ण in स्वर्णैक &c. A. B. D. G. °शृङ्गाम्. F. °मुनेः. D. स्वात्मने. A. स्वात्मनि. B. D. G. °तनयस्याविद्ध°. B. बाणशतैः. G. उदार. C. E. F. इति before उभौ.

35. F. om. कुल. A. B. have °शिरःशिखण्ड. A. °खण्डेश for °खण्डक एष. B. सहानुजस्य & om. परिणाम.

36. A. B. वत्स राम before समरविजयी. A. om. समर.

37. F. इति at the end of the speech.

38. B. किम् for हुम् & °खण्डम् for °भङ्गम्. G. जनकनृप. D. ममा॰

पुनः सानुक्रोशम् ।

बाला वैधव्यदीक्षां जनकपतिसुता नार्हतीयं मदस्त्रात्

पुनर्विचिन्त्य सामर्षम् ।

आः शान्तोऽसौ कुठारः कथमयमधुना रेणुकाकण्ठशत्रुः ॥ १८ ॥

प्रकाशम् । दाशरथे इयमसौ मे त्वयि समुदाचारानुसारिणी वाग्वृत्तिरेव ।

39 रामः । विहस्य । मनोवृत्तिस्तु कीदृशी ।

40 जाम० ।

चण्डीशकार्मुकविमर्दविवर्धमान-
दर्पावलेपसविशेषविकाशभाजोः ।
बाह्वोस्तवाहमधुना मधुना समानै-
राराधयामि रुधिरैः कठिनं कुठारम् ॥ १९ ॥

41 रामः । भगवन् निग्रहानुग्रहयोः स्वाधीनोऽयं जनः । परं ते कोपबीजं ज्ञातुमिच्छामि ।

42 जाम० । अहो दर्पान्धता यदात्मना कृतमस्माभिरुक्तमपि नावधारयति निजदुर्विनयम् । ननु रे

येनोपदिष्टमद्यापि पुरस्त्रीविरहव्रतम् ।
न भग्नं तत्त्वया भग्नं जगद्गुरुशरासनम् ॥ २० ॥

स्त्रात्. A. B. सरोषम्. C. E. F. श्रान्तः for शान्तः. A. D. अयम् & G. मे for असौ. A. om. मे before त्वयि. C. E. F. om. एव.

39. D. om. विहस्य.

40. A. विकर्ष for विमर्द. C. अवलेश. A. आप्याययामि.

41. All except B. G. om. परम्. A. तेन for ते & तु before ज्ञातुम्.

42. A. B. ते after अहो & अवधारयसि. A. येनोद्दिष्टमथाधायि. B. G. भुग्नम् for the first भग्नम्. D. न तु भग्नं त्वया &c.

43 रामः। भगवन् अलीकलोकवार्तया निरपराधे मयि मुधाकोपकलङ्कितोऽसि।

44 जाम०। तत्किं स्वस्ति हरकार्मुकाय।

45 रामः। नहि नहि।

46 जाम०। तत्कथं निरपराधोऽसि।

47 रामः।

मया स्पृष्टं न वा स्पृष्टं कार्मुकं पुरवैरिणः।
भगवन्नात्मनैवेदमभज्यत करोमि किम् ॥ २१ ॥

48 जाम०। आः कथं चन्दनदिग्धं नाराचं निधाय हृदयं मे शीतलयसि। तदलमनेन। कुठारमुद्यम्य।

हे राम कामरिपुकार्मुकमर्मघात-
संजातपातक तवैष कठोरधारः।
सीताकरव्यतिकरप्रतिबन्धबन्धुः
कण्ठं पुरा विशति निष्करुणः कुठारः ॥ २२ ॥

तत्प्रवीरो भव।

49 रामः।

हारः कण्ठं विशतु यदि वा तीक्ष्णधारः कुठारः
स्त्रीणां नेत्राण्यधिवसतु नः कज्जलं वा जलं वा।

---

43. A. B. एव किमिति after मुधा.
44. D. °कार्मुकस्य.
47. B. एतत् for इदम्.
48. A. B. रे after कथम्. A. निखाय. D. om. मे. C. D. E. F. उत्साद्य for उद्यम्य. F. °महाविधि° for °व्यतिकर°. G. प्रतिकूल & विशतु. B. कृपाणः for कुठारः. C. E. F. प्रतिवीरः.

49. F. कण्ठे. C. E. वा & F. परम् for नः.

संपश्यामो ध्रुवमिह सुखं प्रेतभर्तुर्मुखं वा
यद्वा तद्वा भवतु न वयं ब्राह्मणेषु प्रवीराः ॥ २३ ॥

50 जाम० । आः कथं मामपि प्रणतिपात्रं ब्राह्मणमात्रमिव मन्यसे ।

पुनः सामर्षम् ।

जानीषे न हि जामदग्न्यमपि रे यद्दोर्दण्डोःकन्दल-
द्वन्द्वास्कन्दितबाहुना रणभुवि स्कन्देन मन्दौजसा ।
नास्राक्षीद्भुजसंपदं मम कथं वक्त्रानुसारादिति
क्रुद्धेनोद्धृतमैक्षि शङ्करकरन्यस्तं विधातुः शिरः ॥ २४ ॥

पुनः सामर्षम् । किमात्थ रे किमात्थ । न वयं ब्राह्मणेषु प्रवीरा इति । कथं क्षत्रियजातिगर्वितो ब्राह्मणजातिं तृणाय मन्यसे । तदिदानीमनयोः का गरीयसीति संग्रामतुलैव निर्णेष्यति ।

51 रामः ।

भो ब्रह्मन् भवता समं न घटते संग्रामवार्तापि नः
सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्धनि ।

52 लक्ष्मणः । जामदग्न्य एवमेतत् ।

यस्मादेकगुणं शरासनमिदं सुव्यक्तमुर्वीभुजा-
मस्माकं भवतां पुनर्नवगुणं यज्ञोपवीतं बलम् ॥ २५ ॥

---

50. F. om. कथम्. A. रे before माम्. B. °पात्रमात्रं ब्राह्मणम् & C. E. °पात्रब्राह्मणमात्रम्. B. C. E. F. अन्यम् before इव. A. B. सरोषम्. A. जामदग्न्यपरशोः & नोस्राक्षीत्. C. D. E. F. अस्राक्षीः. A. कथमयम्. F. पुनः for कथम्. A. शिरोब्राह्मणः (णम्), & om. पुनः सामर्षम् & adds रे after the second आत्थ. G. वीराः. B. °गर्वितोऽसि & इदम् for इदानीम्. A. B. D. G. आवयोः for अनयोः' All except A. B. निर्णेष्यते.

52. A. युष्माकं तु ततोऽधिकम् for अस्मा ... पुनः.

53 रामः। वत्स अलमिह माननीये मुनौ दुर्विनयवैदग्ध्येन।

54 जाम०। अस्य को दोषः।

दारैर्मुक्तकुचांशुकैः परिवृतं प्राचीनमेषां नृपं
नाहिंसीद्यदसौ कुठारहतकस्तस्यैतदुज्जृम्भितम्।
यन्नारीकवचान्वयप्रणयिनां क्षत्राधमानामिमा
दुर्वाचः प्रविशन्ति मे श्रवणयोर्धिक् क्षत्रगोत्रे कृपाम्॥२६॥

55 रामः। भगवन् अलमिह क्षीरकण्ठे कठोरकोपतया। तत्क्षम्यताम्।

56 जाम०। आः किमुच्यते क्षीरकण्ठ इति। विषकण्ठः खल्वसौ।

57 लक्ष्मणः। भगवन् शितिकण्ठशिष्येण तर्हि विशेषतः क्षन्तव्यम्।

58 जाम०। सामर्षम्। आः कथं विषकण्ठनामसाम्येन त्वमपि मे गुरुः।

59 लक्ष्मणः। विहस्य। भगवन् अन्याभिसंधानेन मयेदमुक्तम्। यत्किल

किरीटमधिरूढेऽपि बाले प्रालेयरोचिषि।
शितिकण्ठस्य किं चित्ते धत्ते कोपाङ्कुरः पदम्॥ २७॥

तद्भवांस्तदन्तेवासी विशेषतः क्षन्तुमर्हति।

---

53. A. om. वत्स. C. E. माननीयमुनौ.

54. B. अहो before अस्य. A. न for कः. D. कच for कुच & पतिम् for नृपम्. A. अहिंस्यत्.

55. A. om. रामः. D. G. om. भगवन्. A. इहालम्. D. कोपकठोरतया.

56. A. रे before क्षीर°. A. D. अयम् for असौ.

57. A. °शिष्य. B. G. om. तर्हि before which D. हि.

58. C. D. G. om. सामर्षम्. A. D. om. नाम. A. B. मम.

59. A. has not लक्ष्मणः. ... °प्रालेय. C. E. F. om. अभि. D. अस्य संधानेन न मया &c. & चित्ते किम्. A. puts तद्भवान् &c. into the mouth of Râma. A. भगवन् & B. भगवान्. A. °वासिनि मयि. B. D. G. इति after °वासी. A. B. D. F. अर्हसि.

60 जाम०। स्वगतम्। अहो अस्य क्षत्रियबटोर्वाक्परिपाटीपाटवम्। भवतु। प्रकाशम्। तदिदं तावत्क्षान्तमेव मया। अयं तु न क्षमते प्रकृतिकठोरः कुठारः। शीलं न वेत्सि कथमस्य।

क्रीडाविनिर्मितसुदुर्मददोर्विलास-
निःशेषराजकवधस्य परश्वधस्य।
कीलालकीकसकचैः परितो विचित्य
येन द्विधापि विदधे पृथिवी त्रिवर्णा ॥ २८ ॥

पुनः सामर्षम्। कथमस्य हरप्रसादपरशोः शीलमपरिशीलितं ते।

यत्र क्रामति सङ्गराङ्गणभुवं दुर्वारधाराञ्चल-
क्षुण्णक्षत्रकिशोरकण्ठरुधिरैर्नीरेणुका भूरभूत्।
तादृग्बालवरस्वयंवरपरस्वर्लोककन्याकर-
क्रीडापुष्करदामरेणुभिरभूद्द्यौरेव रेणूत्कटा ॥ २९ ॥

61 लक्ष्मणः। भगवन् एतत्सत्यं यत्किल भवत्कुठारधाराञ्चलविलसितेन नीरेणुका भूरभूदिति।

62 जाम०। स्वगतम्। आः कथमयं रेणुकावृत्तान्तेन मर्म विध्यति। भवतु। प्रकाशम्। अये क्षत्रियपोत अलमिह निरपराधे भवति मुधा परश्वधपातेन। तदयं मे प्रकृतिकठोरभाषिणं भवत्कण्ठमेव पातयति कुठारः।

---

60. B. om. क्षत्रिय & पाटी, and puts च after पाटवम्. A. B. om. तत्. A. B. G. om. तावत्. D. F. क्षन्तव्यम्. D. अति for प्रकृति & किम् for कथम्. A. वितत्य & D. G. विचिन्त्य. A. B. D. G. त्रिधा. A. B. आक्रामति. A. कठोर for किशोर. A. B. G. वीर for बाल. A. °वरे स्वयंवरच्चरे.

61. C. D. E. F. om. यत्किल. C. E. F. त्वत् for भवत्.

62. A. B. om. आः. G. om. अयम्. A. B. घट्टयति for विध्यति. A. B. तत् before अलम्. A. आपातेन. F. मर्म before कठोर. A. B, G. शातयति for पातयति.

63 नेपथ्ये । अये जामदग्न्य कथमतिप्रगल्भसे । तदिदमिदानीं भवच्छासनाय शरासनमादीयते ।

64 जाम० । विहस्य । कथमयं जनकः । उच्चैः । अये याज्ञवल्क्यशिष्य किं भवतः शरासनेन । पद्मासनमेवावलम्बस्व । पुनः सोत्प्रासम् ।

युष्माकं भोः सुघटितबहुन्यस्तपद्माक्षकण्ठा
मिथ्योत्कण्ठा किमिति समिति क्षत्रियश्रोत्रियाणाम् ।
तेऽन्ये चञ्चत्करतलचलच्चण्डनिस्त्रिंशधारा-
धौतारातिद्विपमदमषीपङ्कपूराः प्रवीराः ॥ ३० ॥

तदलं भवता । एतावेव तावत्क्षत्रियस्फुलिङ्गौ निर्वापयामि ।

65 पुनर्नेपथ्ये । अये जामदग्न्य कथं तथा शमधनसमृद्धस्य जमदग्नेस्तनयोऽपि शमदुर्गतोऽसि संवृत्तः ।

66 जाम० । कथमयमाङ्गिरसः । उच्चैः । अये शतानन्द कथय तावदिदमेवंविधं शमाभिधानं धनं कस्मात्पितुरुपात्तं गौतमाद्वा गोत्रभिदो वा ।

67 नेपथ्ये । आः पाप क्षत्रियापुत्र निजजननीकण्ठताण्डवितकुठार कुलाङ्गार कथं तपस्तुङ्गमाङ्गिरसमपि कुलं कलङ्कयसि ।

---

63. A. जनकः before अये. A. B. om. अये. B. repeats जामदग्न्य. A. इति for अति. A. B. om. इदम्. A. B. G. आनीयते.

64. B. om. विहस्य. D. om. एव. A. om. सोत्प्रासम्. C. सोत्त्रहासम् & F. सोत्प्रासहासम्. E. लसति for समिति. C. D. E. F. om. तावत्.

65. A repeats जामदग्न्य. D. विलथं for तथा. A दम for धन & puts दम before दुर्गतोऽसि. F. दुर्गमः for दुर्गतः.

66. A. दम after शम. B. F. G. om. धनम्. B. G. om. पितुः. D. G भगवतः before गौतमात्. B. om. the first वा.

67. B. G. om. पाप. A. D. om. निज. A. °ङ्गारक.

68 जाम० । आः पाप कुलपांसन पांसुलापुत्र कथं भृगूणामप्यग्रे तपस्ताण्डवं मण्डयसि ।

69 रामः । भगवन् सकललोकविख्यातमिदं भृगूणामाङ्गिरसां च कुलम् । तपोविशेषतस्तु भवतो भर्गशिष्यस्य । अत एव विज्ञापयामि ।

तपः शान्तं चेतः स्फटिकमणिमालापरिकरः
कुशाः कुण्डी दण्डः सततमुटजावासवसतिः ।
मुनीनामेतद्वः समुचितमुदग्रं न वचनं
न वक्रभ्रूभङ्गो न शरधनुषी नापि परशुः ॥ ३१ ॥

पुनः सविनयम् । भवानेव तावद्विचारयतु ।

क्व परशुरशुभस्ते कुत्र गोत्रं पवित्रं
क्व धनुरिदमुदग्रं निर्मलं कुत्र शीलम् ।
घनसमरकराला कुत्र नाराचमाला
कुशकिशलयलीला कुत्र वा पर्णशाला ॥ ३२ ॥

70 जाम० । कथमन्यमिव मामपि मुनिमात्रं मन्यसे । स एष जामदग्न्यः खल्वहम् ।

क्षुण्णक्षत्रकठोरकण्ठविगलत्कीलालधारासरि-
न्निर्वृत्ताभिषवस्य कृत्तशिरसां केशान्कुशान्कुर्वतः ।

---

68. D. om. अपि. G. अन्वये for अप्यग्रे. D. विडम्बयसि for मण्डयसि.

69. G. E. F. आंगिरसानाम्. B. D. om. कुलम्. B. तथापि & D. तयोः for तपः. A. विशेषः. D. om. तु. A. B. D. G. om. भवतः. A. भार्गव for भर्ग. D. भार्गवस्य. A. B. च for एव. B. D. G. निरतिः for वसतिः. D. नवनवम् for न वचनम्. A. G. सविस्मयम्. F. भगवान्. A. D. F. put च after क्व & उग्रम् for उदग्रम्. D. G. हेला for माला.

70. F. परशुः for जामदग्न्यः. B. कथमिव मां मुनिपुत्रं मन्यसे. G. प्रणातिपात्रं in place of अपि. A. मुनिपुत्रम्.

गृह्णन्रक्तजलाञ्जलीन्पितृगणो यस्य क्षणं स्वीकृतः
संतोषेण जुगुप्सया करुणया त्रासेन हासेन च ॥ ३३ ॥
तदलम् । इदानीमपि
कृत्वा त्रिःसप्तकृत्वः समिति विशसनं पूर्वमुर्वीपतीनां
कृत्वान्यत्सप्तकृत्वः पुनरपि कदनं दुर्मदानां नृपाणाम् ।
निर्माय क्ष्मापतीनां प्रतिसमरहतैरुत्तमैरुत्तमाङ्गैः
कापालीमक्षमालां झटिति भगवतो भैरवस्यार्पयामि ॥ ३४ ॥

71 रामः ।
प्रसीद त्वं रोषाद्विरम कुरु मे चेतसि गिरं
चिरं यत्सायासैर्बहुभिरिह वारैर्जितमभूत् ।
यशोवृत्तं वित्तं कितव इव विक्षोभतरल-
स्तदेतस्मिन्वारे भृगुतिलक मा हारय मुधा ॥ ३५ ॥

72 जाम० । कथं रे हारयिष्यामि । विमृश्य । अथवा
किं नाम वाग्डम्बरपण्डितेषु
युष्मासु बाणाः प्रचुराः प्रयुञ्जे ।
बाणान्रिपुप्राणहरान्मदीया-
न्सर्वेऽपि यूयं सहिताः सहध्वम् ॥ ३६ ॥

73 रामः । किमन्यैरन्वहमेव हरशरासनारोपणोपनीयमानजानकीकर-

C. E. F. किशोर for कठोर. D. कृत्त-शिरसः. A. क्षण°. B. G. क्षणं विस्मितः. D. च करुणा for करुणया. A. D. अहम् for अलम्. All except G. om. अपि. F. अन्यः for अन्यत्.

71. A. B. अञ्जलिं बद्ध्वा. A. C. D. E. F. त्वयारोषात्. B. सायासै. & G. चायासैः, A. वृत्तं वृत्तम्, D. वित्तं वित्तम् & B. G. वित्तं वृत्तम्. A. ते & D. च for वि°. A. B. G. °तरलम्. B. यत् for तत्.

72. A. B. कितव इव after रे, & विहस्य. A. प्रयुज्य. D. तेनहि । बाणप्रहारान्त्रिपुणान्मदीयान्. C. E. F. पुनः for रिपु°. A. क्षमध्वम्.

73. D. om. किमन्यैः. A. B. D. om. हर. D. आरोपणपण. D. G. उपनीत. A. B. विचल for मिलत्. C.

किसलयलीलानिहितकमलमालिकामिलदलिपटलकोलाहलसंगी-
तयशःपरिमलेन वक्षःस्थलेन सहिष्ये ।

74 जाम० ।

ईशत्यक्तपुराणचापदलनप्रोद्भूतगर्वोद्धति-
व्यग्रस्त्वं कतरः स मे तव गुरुः सोढुं न शक्तः शरान् ।
तुष्टादिष्टवरप्रदाद्भगवतः पद्मासनात्सादरं
मन्नाराचभयादयाचत किल ब्राह्मीं तनूं कौशिकः ॥ ३७ ॥

75 रामः । स्वगतम् । कथमयं भगवन्तं विश्वामित्रमप्यधिक्षिपति । त-
दतःपरं न सहिष्ये । प्रकाशम् । कथं रे ।

ईशत्यक्तपुराणचापदलनप्रोद्भूतगर्वोद्धति-
व्यग्रोहं कतरः स ते मम गुरुः सोढुं न शक्तः शरान् ।
तुष्टादिष्टवरप्रदाद्भगवतः पद्मासनात्सादरं
त्वन्नाराचभयादयाचत किल ब्राह्मीं तनूं कौशिकः ॥ ३८ ॥

पुनः साटोपम् । अये जामदग्न्य

तत्कोदण्डं कुलिशकठिनं भग्नमेतेन भग्नं
मग्नं शल्यं तव हृदि महन्मग्नमास्तावता किम् ।

E. बहलकोलाहल. A. संमीलितयशः &c. & सहिष्ये for सहिष्ये.

74. F. गर्वोद्धृतिः. D. व्यग्रस्त्वम्. A. यत् for मत्.

75. All except A. B. om. अयम् & अपि. F. ° क्षिपसि. D. om. तत्. A. B. D. G. om. कथं रे. A. B. पुनः साटोपम् after प्रकाशम्. A. om. ईशत्यक्त ... अये जामदग्न्य. B. has अये इषदिति व्यग्रोऽहं स ते मम गुरुरिति त्वन्नाराचभयादिति पदव्यत्यासेन पुनः श्लोकं पठति for our ईशत्यक्त...: कौशिकः. D. ईशत्यक्तपुराणेति पठति for the whole stanza. C. E. F. गर्वाङ्कुर ° C. E. मे तव for ते मम. G. adds इति पदव्यत्यासेन पुनः श्लोकं पठति after कौशिकः. D. सकोपम् for साटोपम् after which C. E. F. add च. F. भीमं for the second भग्नं. F. लग्नम् & G. भग्नम् for the second

त्रैयक्षं वा भवतु यदि वा नाम नारायणीयं
नैतत्किञ्चिद्विगणयति मे दुर्मदो दोर्विलासः ॥ ३९ ॥

76 जाम० । सहर्षम् । साधु रे क्षत्रियपोत खद्योतसम साधु । यत्किल जामदग्न्यनाम्नश्चण्डधाम्नः पुरतो विद्योतसे । पुनः सामर्षम् । किमात्थ रे किमात्थ । तदेव पठति ।

77 रामः । नन्विदं भूयोऽप्युच्यते । पुनस्तदेवपठति ।

78 जाम० । साधु स्मारितोऽस्मि ।

79 रामः । किं तत् ।

80 जाम० ।

कराघाताद्विष्णोस्तरलवनमालापरिमल-
भ्रमद्भृङ्गध्वानद्विगुणितविकाशः समजनि ।
स यस्य ज्याघोषः सुररिपुवधूवर्गरुदित-
ध्वनिः स्वाध्यायानां प्रणव इव तत्कार्मुकमिदम् ॥ ४० ॥

81 रामः ।

करपङ्केरुहक्रोडे क्रीडितं येन शार्ङ्गिणः ।
तदेतत् ।

मम्रम्. B. D. G. एतावता for आस्तावता. D. G. गणयति स. C. वाग्विलासः & G. दुर्विलासः.

76. A. रामः for जामदग्न्यः. C. E. add साधु after °पोत. A. B. राजन्यखद्योत for खद्योतसम. D. om. the last साधु. C. चन्द्रधाम्नः. A. अपि after पुरतः G. खद्योत इव after पुरतः, & om. पुनः सामर्षम्. F. om. रे किमात्थ. C. E. पुनस्तदेव. D, G. om. तदेव पठति & put it in the mouth of राम (77).

77. A. om. this speech. D. om नन्विदं.. पुनः.

78. A. om. this speech.

79. C. E. जामदग्न्य किं तत्.

80. C. D. E. om. जामदग्न्य. A. विकारः for विकाशः.

81. D. °पङ्केरुहाक्रान्त्या. C. E. F. कुंडे for क्रोडे. A. B. D. G. क्रीडितम्.

82 जाम॰ ।

अथ किं यदि शक्तोऽसि गृहाण विगृहाण वा ॥ ४१ ॥

83 रामः । गृह्णामि ।

84 जाम॰ । तदेहि बाष्पायमाणभवद्बन्धुजनबन्धुरां वसुंधरामतिक्रम्य समरक्षमां क्षमामवतरावः । इति निष्क्रान्तौ ।

85 लक्ष्मणः । विलोक्य सहर्षं सकौतुकं च ।

मा शाम्भवं धनुरिवेदमपि प्रयातु
भङ्गप्रसङ्गमिति मन्दचलद्भुजेन ।
आर्येण कार्मुकमपीदमहो सहेलं
चक्रीकृतं भगवतो गरुडध्वजस्य ॥ ४२ ॥

86 नेपथ्ये । अहो कौतुकम् ।

उद्भिन्नश्चापचक्रादमरपरिहृतव्योमरन्ध्रावगाही
बाणोऽयं राघवस्य त्रिदशपुरगतिच्छेदकृद्भार्गवस्य ।
हंसीभूतः सुरस्त्रीकरकमलगलत्पुष्पसौरभ्यलुभ्य-
द्भृङ्गीसङ्गीतभङ्गीपरिचलितयशास्तूणपर्यङ्कमेति ॥ ४३ ॥

ततः प्रविशतो रामजामदग्न्यौ ।

87 जाम॰ । रामं विलोक्य निर्वर्ण्य च स्वगतम् ।

त्रिलोकी कोकीयं मुदमुदयतायेन लभते
विकाशं चाधत्ते मुनिजनमनःपङ्कजवनम् ।

---

82. B. राम त्वं after शक्तोऽसि. A. च for वा.

83. A. C. E. F, गृण्हाति.

84. C. E. F. वधू for बन्धु & क्ष्माम् for क्षमाम्.

85. A. B. अहो कौतुकम् for सहर्षं ...च. C. E. F. सकौतुकं सहर्षं च. A. om. the stanza. D. वलत् for चलत्. F. सलीलं for सहेलं.

86. A. B. om. नेपथ्ये । अहो कौतुकम्. A. हंसीभूतामरस्त्री° & लसत् for गलत्. D. भृङ्गीराजीविरावैः परिरचित°. A. परिमिलित. C. E. F. परिचरित°. D. G. स्वर्ग for तूण. A. D. °पर्यन्त.

87. A. लोकोऽयं for कोकीयं. All except B. G. have येन for अनेन. B, C. E. F. वा for च.

अये कोऽयं बालः कुवलयदलश्यामलतनु-
र्जगद्योनिर्ज्योतिः कथमिदमहो तत्परिणतम् ॥ ४४ ॥

पुनर्विमृश्य ।

आपूरणाय पुरवैरिशरासनस्य
बाणात्मना परिणतः किल लीलया यः ।
आरोपणाय पुनरस्य स एव शङ्के
बालात्मना परिणतः पुरुषः पुराणः ॥ ४५ ॥

प्रकाशम् । वत्स इत इतः ।

88 रामः । सलज्जमधोमुखस्तिष्ठति ।

89 जाम० । उपसृत्य रामस्य चिबुकमुन्नमय्य । अये किमिह लज्जास्थानम् ।

कमलबन्धुविलोचन यस्त्वया
स्वमहिमोन्नमनैरधरीकृतः ।
न किमसावधरीकुरुते नर-
स्त्रिदशकोटिकिरीटमणीनपि ॥ ४६ ॥

90 रामः । अञ्जलिं बद्ध्वा । भगवन्नलमनेन । दुर्विनयपङ्कमलिनीकृतमात्मानं तावद्भवच्चरणनखकिरणतरङ्गिणीजलेन क्षालयामि ।

चण्डमेव किल तिग्मरोचिषः
सौम्यमेव किल शीतरोचिषः ।

E. F. वृत्ते. All except B. G. have योऽयं. D. इहमहो. C. E. F. परिणतमहो तत्कथमिदम्. F. repeats पुनः. A. B. पुरुषः पुराणः for किल लीलया यः. A. om. the last two lines of the stanza.

88. A. B. G. om. one इतः.

89. B. G. om. अये & read इति for इह. A. B. जलज for कमल.

90. A. om. अञ्जलिं...बद्ध्.

चण्डसौम्यमिति कौतुकावहं
नौमि तावकमहं महन्महः ॥ ४७ ॥

इति पादयोः पतति ।

91 जाम० । उत्थाप्य । अयि निसर्गकल्याणनिधे आशीरुक्तिरपि त्वयि पुनरुक्तिरेव । तथापीदमाशास्महे ।

यशःपूरं दूरं तनु सुतनुनेत्रोत्पलवनी-
तमस्तन्द्राचण्डातप तप सहस्राणि शरदाम् ।
इयं चास्तां युष्मच्छरशमितलङ्केश्वरशिरः-
श्रितोत्सङ्गानन्दत्सुरनरभुजङ्गा त्रिजगती ॥ ४८ ॥

तदनुजानीहि माम् । इति निष्क्रान्तः ।

92 रामः । कथं नयनपथमतिक्रान्त एव भगवान् । तदेहि भृगुकुलतिलकवियोगखिन्नमात्मानं बन्धुजनविलोकनेन विनोदयावः ।

इति निष्क्रान्ताः सर्वे ।

चतुर्थोऽङ्कः समाप्तः ।

F. भगवत् for भवत्. D. om. किरण. A. कौतुकं वहन्.

91. B. G. om. उत्थाप्य & निसर्ग. D. °निधे: & om. त्वयि. A. om. इदम्. D. नेत्रोत्सववती. C. D. E. F. °चन्द्रा° for चण्डा°. D. °तपन.

92. G. लक्ष्मणं प्रति । ननु before कथम्. A. विनोदयामः & D. आनन्दयावः.

॥ पञ्चमोऽङ्कः ॥

ततः प्रविशतो गङ्गायमुने ।

1 गङ्गा । सखि कालिन्दि किमिति दुर्मनायसे ।

2 यमुना । भअवदि भाईरहि अत्थि कारणम् ।

3 गङ्गा । कीदृशं तत् ।

4 यमुना । एक्कं दाव । अत्थि मह भादा सुग्गीवोत्ति ।

5 गङ्गा । सकौतुकमात्मगतम् । अये कथमस्याः कपिकुलोत्पन्नोऽप्ययं भ्राता । विमृश्य । उपपन्नमिदम् । अनयोः खल्वेक एवायं भगवान्सवित प्रसविता । प्रकाशम् । अथ किं तस्य ।

6 यमुना । सोऽतिवलिट्ठेण दुट्ठवलीमुहेण वालिणामहेएण परिहदो एक्कदुग्गमेत्तसरणो कइपअपरिवारो चिट्ठदि ।

7 गङ्गा । नन्विमावपि भ्रातरौ । तत्कथमनयोरीदृशं वैरायितम् । अथवा

एकामिषाभिलाषो हि बीजं वैरमहातरोः ।

इति ख्यातमेतत् । तत्किमनेन । द्वितीयमपि कारणं कथय तावत् ।

---

2 भगवति भागीरथि अस्ति कारणम् ।

4 एकं तावत् । अस्ति मम भ्राता सुग्रीव इति ।

6 सोऽतिबलिष्ठेन दुष्टवलीमुखेन वालिनामधेयेन परिहत एकदुर्गमात्रशरणः कतिपयपरिवारस्तिष्ठति ।

---

1. C. D. E. F. om. इति.

4. C. om. यमुना. A. मे for मह.

5. A. B. om. अपि. D. G. om. अयम्. A. D. G. om. भगवान्. A. पिता.

6. D. om. सोति. A. C. E. F. om. ति. D. F. वालिमाहिन्द्रेण. A. B. G. परिहूदो. D. क इव अस्य. C. E. F. वट्ठदि. B. चिट्ठदित्ति.

7. A. B. G. किम् for कथम्. A. एतादृशम्. A. B. G. इत्यर्धोक्त एव after वैरायितम्. A. om.

8 यमुना। कास्सिंपि दिअहे गहीअतवस्सा विअ मम्महवसन्ता दोवि तरुणा जटाहरा एक्का चक्कवाकपीणत्थणी चन्दवअणा मं उत्तरिअ दक्खिणतीरेण चालिदुं उवक्कन्ता ।

9 गङ्गा। ततस्ततः।

10 यमुना। तदो तीए खणं विलम्बिअ पणमिअ मुउलिअकरकमलजुअलाए अहमेरिसं विण्णत्ता। अयि देवि दिणअरणन्दिणि पुणोवि णिअकुडुम्बस्स दंसणप्पसादं करेसुत्ति ।

11 गङ्गा। तत्कथं संभावयसि ।

12 यमुना। गङ्गायाः कर्णे। एवमेवम् ।

13 गङ्गा। असंभावनीयमिदम्। तन्नूनमावर्तशतभ्रमितहृदया किमप्यलीकमनुभूतवती । अथवा को जानाति विधेः संविधानवैदग्ध्यम् ।

14 यमुना। जइ संवुत्तो ता कहं भअवदीए ण गोअरो इमो वुत्तन्तो ।

---

8 कस्मिन्नपि दिवसे गृहीततपस्याविव मन्मथवसन्तौ द्वौ तरुणौ जटाधरावेका चक्रवाकपीनस्तनी चन्द्रवदना मामुत्तीर्य दक्षिणतीरेण चलितुमुपक्रान्ता ।

10 ततस्तया क्षणं विलम्ब्य प्रणम्य मुकुलितकरकमलयुगलयाहमीदृशं विज्ञप्ता। अयि देवि दिनकरनन्दिनि पुनरपि निजकुटुम्बस्य दर्शनप्रसादं कुरुष्वेति ।

14 यदि संवृत्तस्तत्कथं भगवत्या न गोचरोऽयं वृत्तान्तः ।

हि for which D. has अयम्. D. महावैरतरोः & has एतत् for इति. E. स्थानं for ख्यातम् A. om. एतत् for which C. D. E. F. have इदम्.

8. A. B. एक्कस्सिं. B. om. पि after which F. has हि. A. दुवे. B. दोण्हि. D. दोण्णि & E. दो. A. B. G. om. पीण. C. E. F. मे for मं. D. G. दक्खिणं & om. तीरेण.

10. A. B. D. G. add अ after तदो. D. णमिअ मौलिकरकमलाए. A. एवं for एरिसं. D. om. पुणो & has संदसण° F. करेत्ति.

12. A. एवं विअ. C. E. F. एवमेतत्.

13. D. असंभाव्यम्. B. इदानीम् after नूनम्.

15 गङ्गा । न किंचिदेतत् । मया हि ब्रह्मलोकादागतायाः सरस्वत्याः समागमसुखव्यग्रचित्तया स्थितम् । तदेहि इयमदूरे सरयूः । तेन तन्मुखादेव निरूपयावः । इति परिक्रामतः ।

16 प्रविश्य । सरयूः । देव्यौ नमो वाम् ।

17 उभे । अवितथमङ्गला भव ।

18 गङ्गा । सरयूं हस्ते गृहीत्वा । सखि कथं सन्तापनिमग्नमङ्गकं ते ।

19 सरयूः । भगवति प्रतीपं भाषसे । ननु लज्जापङ्कनिमज्जनमनुभवन्त्या मेऽर्घावलम्बनोऽयमङ्गसन्ताप इति ।

20 गङ्गा । स्पष्टं तावत्कथय ।

21 सरयूः ।

बहलगलितैः सन्तापोष्णैस्तटान्तविहारिभि-
र्दशरथपुरीपौरस्त्रीणां विलोचनवारिभिः ।
उपचयवतां सन्तापोष्णां निजां दधती तनू-
मिह मुहुरहं मातर्लज्जां वहामि जहामि च ॥ १ ॥

22 गङ्गा । सातङ्कम् । किं पुनरासामश्रुवृष्टेः कारणम् ।

23 सरयूः । गङ्गायाः कर्णे । एवमेवम् ।

24 गङ्गा । हा इन्दुमतीनन्दन । हा सकललोकहृदयानन्दन चन्दन ।

---

15. A. B. om. तेन. G. तेन हि.

17. A. B. G. put आलि before अवितथ. for which A. B. have अविरल.

18. D. G. तापनि°. A. तापेन मग्नमङ्गम्.

19. D. भवति. A. प्रति मा भा° B. G. आभाषसे. C. E. F. °पङ्क°. D. निममग्नमनू° & ते for मे. A. वलम्बनमिदं यदङ्ग° C. D. E. F.° अविलङ्घनीयः for अर्घा .... नः. B. om. इति.

20. A. B. स्फुटम्. A. B. D. G. आवेदय.

21. C. F. वधतीम्. D. अहमिह मुहुर्लज्जापङ्कम्. A. om. जहामि.

23. C. E. F. एतमेतत्.

24. A. om. first हा. D. om. हृदय. C. D. E. F. om. चन्दन. G. adds महा before कोदण्ड. A. °तन.

हा कोदण्डपण्डित । हा आखण्डलप्रियसख । हा निजतनयनिर्विशेषप्रीतिपरिपालितसकललोक । हा राममद्रैकजीवित ।

25 सरयूः । स्वगतम् । अस्यैव विलसितमेतत् ।

26 गङ्गा । हा महाराज दशरथ । इति मूर्छति ।

27 यमुना । अंशुकान्तेन वीजयन्ती । भअवदि समस्ससिहि समस्सासि । हि णं इमोहिं जेव्व गुणेहिं असोअणिज्जो सो राआ ।

28 गङ्गा । सरयूं प्रति । सखि तवैव न केवलमयं तापः सकलजनसाधारणः खल्वसौ । तदेनं रामभद्रच्छाययापनोदयामः ।

29 सरयूः । निश्वस्य । भगवति न खल्वप्रोषितसेकसलिलः कलमकेदारः परिशुष्यति ।

30 गङ्गा । स्पष्टं तावत्कथय ।

31 सरयूः । अधरस्फुरणं नाटयति ।

---

27 भगवति समाश्वसिहि समाश्वसिहि । नन्वेभिरेव गुणैरशोचनीयोऽसौ राजा ।

यानाम्. D. प्रति for परि which F. om. A. रामचन्द्रैकजीवन. D. om. भद्र. A. B. G. इति मूर्छति after °जीवित.

25. A. अस्यैव (?) विलपितमिदम्.

26. A. om. हा. G. मूर्छिता पतति.

27. A. B. G. अंशुकाञ्चलेन. D. F. वीजयति. C. E. F. om. one समस्सासिहि. A. puts णं इमेहिं... राआ in sanskrit in the mouth of सरयू, where, however, it reads शोचनीयः for असोअणिज्जो. B. om. राआ.

28. , न तवैव. D. om. केवलमयम् & puts अयम् after तापः D. G. सर्व°. F. om. जन. C. E. F. असौ खलु. C. E. F. एतत् for तत्. C. D. E. F. एवम् for एनम्. D. अपनोदय.

29. G. विश्वस्य. A. B. G. °सलिलसेकः. D. om. कलम. A. कमल.

30. A. B. स्फुटम्.

32 गङ्गा । अलमलं कथं दावानलशोषितायां तरुशाखायां कुठारमारोपयितुमिच्छसि । अथवा कथय तावत् ।

33 सरयूः । स्वगतम् । अहो

न ज्ञातुं नाप्यविज्ञातुं नेक्षितुं नाप्युपेक्षितुम् ।
सुजनः स्वजने जातं विपत्पातं समीहते ॥ २ ॥

प्रकाशम् । रामभद्रमभिषेक्तुं कृतमनोरथं दशरथमेत्य कैकेयी प्रथमं तावदिदमुक्तवती ।

इदमेव नरेन्द्राणां स्वर्गद्वारमनर्गलम् ।
यदात्मनः प्रतिज्ञा च प्रजा च परिपाल्यते ॥ ३ ॥

34 गङ्गा । स्वगतम् । अनेनैव तावदकल्याणसूचिः सूचिता दुराशया । प्रकाशम् । चरमं च किम् ।

35 सरयूः ।

त्वया देयं यन्मे द्वयमभिहितं देहि तदिदं
वनं कौशल्येयो विशतु युवराजोऽस्तु भरतः ।

36 गङ्गा । सोद्वेगम् । ततः किं वृत्तम् ।

37 सरयूः ।

इतीदं कैकेय्या वचनमभिगम्याकुलमतेः

---

32. D. om. गङ्गा । अलमलम् । & puts कथं...इच्छसि in the mouth of सरयू in 31. & gives अथवा....तावत् to गङ्गा.

33. A. B. G. अनुज्ञातुम्. D. om. नेक्षितुम्. D. G. स्वजन. D. स्वजनेन जातम्. F. ज्ञातम् for जातम्. C. E. F. द्वार for पात. D. om. दशरथम्. A. उपेत्य. F. om. प्रथमम्. D. अपावृतम् for अनर्गलम्.

34. A. अकल्याणं सूचितं दुराशया. B. °सूची & G. रुची. A. om. प्रकाशम्. A. F. om. च.

36. A. सवेगम्. B. सावेगम्. D. सोद्वेगम्.

37. F. om. सरयूः. A. B. कैके-

पितुः पादौ नत्वा मुदितहृदयोऽसौ वनमगात् ॥ ४ ॥

38 गङ्गा। यमुने तादिदं यत्कथितवत्यसि। सविषादम्। हा रघुकुटुम्बक निहतमसि।

39 यमुना। भअवदि किं एक्कं रहुकुटुम्बअं। णं मिअमहेसिवणदेवदाओ परिहरिअ सअलो जेव्व जीअलोओ रामचन्दमुहचन्दविलोअणाविहीणत्तणेण णिहदो।

40 सरयूः। एवमेतत्।

प्रोषितवति रजनिकरे बन्धुतया न खलु कैरवाण्येव।
म्लायन्ति किन्तु सहसा भुवनान्यपि तमसि मज्जन्ति॥ ९ ॥

41 गङ्गा। सखि सरयु कथय तावदधुना कीदृशी वृत्तिः सीतालक्ष्मणयोर्वत्सरामभद्रे। तौ हि तस्य सदैव संनिहितौ चन्द्रिकाप्रसादाविव चन्द्रमसः।

42 सरयूः। यादृशी चन्द्रिकाप्रसादयोश्चन्द्रमसि।

---

39 भगवति किमेकं रघुकुटुम्बकम्। ननु मृगमहर्षिवनदेवताः परिहृत्य सकल एव जीवलोको रामचन्द्रमुखचन्द्रविलोकनविहीनत्वेन निहतः।

यीवचन &c. B. अवगम्य.

38. D. om. यमुने...असि. C. E. F. om. यमुने & यत्. C. D. G. put कुल after रघु. A. °कुटुम्ब & B. D. G. कुटुम्बम्. B. G. इति for असि.

39. F. om. यमुना. All except A. B. have एक्कं किम्. D. G. रघुकुल. A. पणं before मिअ°. C. D. E. F. om. जेव्व. A. B. विरहि (A. ह) त्तणेण. D. °विहीणो.

40. D. कैरविणी.

41. G. एवमेतदनन्तरम् before सखि. C. E. F. सरयूः. All except A. B. om. अधुना. C. D. E. F. वत्स before सीता°. A. रामचन्द्रे. A. B. G. put तौ हि...चन्द्रमसः in the mouth of सरयू. A. चन्द्रमसि.

42. A. om. यादृशी &c. G. भतो

43 गङ्गा सहर्षं स्वगतम्। कथं सहैव वनं गताविल्युक्तं भवति। प्रकाशम्। सखि जीविताऽस्मि तावदनेन वागमृतेन। ननु क्षणमपि रामचन्द्रविरहमनुभवितुमसहा मे वत्सा जानकी।

44 सरयूः। एवमेतत्। रामचन्द्रेण हीदमुक्ता जानकी।

अम्बाः शुश्रूषमाणा मे शरदः कतिचिन्नय।

इदमाकर्ण्य वचनं तथा मूर्छिता जानकी यथा स्वजनकरोपनीतशीतकरासारसिक्तापि न प्रबुद्धा।

45 यमुना। ता उण कहं पउद्धा।

46 सरयूः।

वनं वनजपत्राक्षि समागच्छ सहैव वा ॥ ६ ॥

इत्यनेन रामभद्रवचनामृतेन।

47 गङ्गा। उचितमिदं जानकीस्नेहस्य।

48 यमुना। अवि णाम रामलक्कणाणं वि कोवि संवादो संवुत्तो।

---

45 तत्पुनः कथं प्रबुद्धा।

48 अपि नाम रामलक्ष्मणयोः कोऽपि सवादः संवृत्तः।

जानात्येव before यादृशी. B. D. इव & G. एव after °प्रतावयोः. G. gives this speech to गङ्गा.

43. D. G. स्वगतं सहर्षम्. D. om. वनम्. A. B. यथा before तावत्. A. B. D. G. om. ननु. D. G. क्षणमपि हि. A. B. रामभद्र. B. D. असहमाना.

44. A. B. रामभद्रेण & तदेवम् for हीदम्. A. कतिचिच्छरदः. B. एव in place of वचनम् which G. om. C. E. F. मूर्छिता जानकी तथा. D. om. आसार.

45. C. E. F. कहं उण.

46. A. तत् for वा. A. B. अनेनैव. F. चन्द्र for भद्र which is omitted by C. D. E. F. D. om. अमृत. All except A. B. put एव after अमृतेन

47. A. om. गङ्गा.

48. A. B. F. om. वि before को. D. कं वि.

49 सरयूः । अथ किम् । इदमुक्तो हि रामभद्रेण लक्ष्मणः ।

गमय वत्स निमील्य विलोचने
कतिचिदत्र निमेषसमाः समाः ।
अपि च मामिव शीलसुशीतलं
शुभरतं भरतं परिशीलय ॥ ७ ॥

इदमुक्तंच लक्ष्मणेन । अये रघुनाथ ।

त्वया समं मे चत्वारि यामा एव युगान्यपि ।
चतुर्दश समाः स्थातुं विना मन्वतराणि मे ॥ ८ ॥

अपिच ।

त्वया मम समेतस्य कल्पा अपि समासमाः ।
भवता तु वियुक्तस्य कल्पकल्पः क्षणोऽपि मे ॥ ९ ॥

50 गङ्गा । अपि नाम कौशल्यया किमपि शिक्षितो रामभद्रः ।

51 सरयूः । अथ किम् । सा हि अपि वत्स रामभद्र सीतामित्यर्धोक्त एव बाष्पाम्बुरुद्धकण्ठीदमुक्तवती । अथवा वत्सलक्ष्मणे रक्षितारि को भवान् सीतासमीक्षणस्य । तदेवं तावदभ्यर्थयामि ।

---

49. D. F. G. रामचन्द्रेण. A. om. च after उक्तम्. C. E. F. om. अये रघुनाथ. A. यामन्येव & राम त्वया समेतस्य. B. C. E. F. समम् for मम. A. समाः समाः & C. E. सनैः समाः. B. G. विप्रयुक्तस्य. A. मम for अपि मे.

50. B. om. नाम. D. om. किमपि for which G. अपि किंचित्. D. रामचन्द्रः.

51. F. om. सीताम्. A. बाष्पकण्ठम्. D. अव° in place of अम्बु which B. G. om. C. E. F. सति after रक्षितारि. A. B. वा after कः & °समीक्षणे. G. इदम् for एवम्. A. B. तदेतदेव त्वाम (B. भ्य) र्थयामि. A. B. G. मुग्धमुखे. D. यस्तु ते सहज &c., C. D. E. F. रामेण. C. E. G. अपि for अयि. D. G. °जीविते अपि. A. रक्षिणीभवितव्यम्. B. इत्यत्रापि.

इह दुग्धमुखे वत्स लक्ष्मणे दक्षिणो भव ।
अपि राज्योपभोगेभ्यो यस्य त्वं सहजप्रियः ॥ १० ॥

इदमुक्तं च रामभद्रेण । अयि मातर्निजजीविते दक्षिणेन भवितव्यमित्यपि शिक्षणीयमेव ।

52 गङ्गा । तन्नूनं ततःप्रभृति सहजसौन्दर्यमेवाभरणं वत्सरामस्य ।

53 सरयूः । अन्यदप्येकम् । विमुञ्चन्सकलमाभरणजातमित्थमभ्यर्थितः कौशल्यया रामभद्रः ।

हस्तावलम्बदानाय सीतामाङ्गल्यसम्पदः ।
इदं विमुञ्च मा वत्स राम रत्नाङ्गुलीयकम् ॥ ११ ॥

इदमन्यच्च ते कथयामि । धीरं समाकर्णय ।

54 गङ्गा । कथमेतावदाकर्णितवतीमपि मामधीरामाशङ्कसे ।

55 सरयूः ।

निकामं रामस्य प्रमुदितमुखाम्भोरुहरुचे-
र्जटावल्लीर्मल्लीमुकुलसदृशैर्बाष्पपृषतैः ।
निषिञ्चन्सौमित्रिः कथमपि वितेने खलु यदा
तदा जातं मातः करुणमयमेतज्जगदपि ॥ १२ ॥

A. B. शिक्षितव्यम्. C. E. F. om. एव.

52. A. B. om. तत्. C. E. F. om. वत्स. A. B. om. राम.

53. A. विमुञ्च. C. D. E. F. खलु before सकल°. A. om. जात. D. F. इति for इत्थम्. A. B. D. रामचन्द्रः. C. E. F. °मङ्गल.° D. अन्यदपि. A. D. कथयामि ते. A. धीरे & all others except D. धीरा.

55. A. °वल्लीमल्ली°. C. E. मातर्जातम्.

56 यमुना । अवि णाम तस्सिं समए सीदा वि किंवि सिक्खिदा बन्धुअणेण ।

57 सरयूः । अयि देवि विपरीतमालपसि ।

गहनविपिनवासोत्कण्ठया संप्रयातं
प्रियतममनुयान्त्या तत्क्षणं राजपुत्र्या ।
चरणकमलगुञ्जन्मञ्जुमञ्जीरशब्दैः
स्फुटतरमुपदिष्टा बान्धवाः साधुवृत्तम् ॥ १३ ॥

इदं तु वृत्तम् ।

पुरः कान्तं यान्तं विपिनमनुयान्त्याः सरभसं
तदा तौ सीतायाः किसलयनिभौ वीक्ष्य चरणौ ।
मुहुः शीतास्तप्ताः किमपि च मुहुर्बन्धुनयनैः
समं मुक्ता मुक्तासदृशरुचयो बाष्पकणिकाः ॥ १४ ॥

58 गङ्गा । हर्षविषादयोर्विलसितमेतत् ।

59 सरयूः । इदं च बन्धुजनेन शिक्षितो रामभद्रः ।

बाला विदेहतनया तरलौ भवन्तौ
दिग्दक्षिणा च रजनीचरचक्रजुष्टा ।
तद्वत्स वत्सलतयेदमुदाहरामो
मा राम गच्छ नयदक्षिण दक्षिणाशाम् ॥ १५ ॥

---

56 अपि नाम तस्मिन्समये सीतापि किमपि शिक्षिता बन्धुजनेन ।

---

56. A. B. om. वि after सीदा.
57. A. om. देवि. A. B. तथा ननु before गहन. &c. D. उपादिष्टं बन्धुभिः. C. E. F. बन्धवः. B. D. G. तदा तौ. C. D. E. F. समुन्मुक्ताः.

58. B. सत्यम् before हर्ष°. A. तत् for एतत्.
59. A. om. सरयूः & has स before इदम्. C. E. F. तु for च which D. G. om. A. बन्धुजनैः. A. D. G.

60 गङ्गा। ततस्ततः।

61 सरयूः। ततस्तामेव दिशं प्रति

सुरमुरजगभीरधीरनाद-
द्विगुणगुणध्वनिचापदत्तहस्तः।
पुरजननयनैः कृतं दधानः
कुवलयदाम जगाम रामभद्रः॥ १६ ॥

62 यमुना। को उण सो अवसरो सुरमुरअसद्दस्स।

63 गङ्गा। सखि न जानासि। गभीरं ध्वनद्भिः खलु सुरमुरजैः किमपि गभीरमेव ध्वनितम्। पुनः सविषादम्। हा दशरथ सकलगुण-संपदां भाजनं भूत्वापि कथमेकस्य भागधेयस्य भाजनं न जातोऽसि।

64 यमुना। कहं उण सो राआ तुम्हेहिं पसंसीअदि जेण तारिसो वि तणओ तुणं विअ मुक्को।

65 सरयूः। शान्तं पापम्।

---

62 कः पुनः सोऽवसरः सुरमुरजशब्दस्य।

64 कथं पुनः स राजा युष्माभिः प्रशस्यते येन तादृशोऽपि तनयस्तृणमिव मुक्तः।

रामचन्द्र. A. नुष्टा, D. G. पुष्टा, & F. पुष्टा. D. दक्षिणस्याम्.

60. A. om. one ततः.

61. F. om. ततः ... प्रति. A. om. ततः. D. om. दिशम्. A. सुरजन.

63. D. om. न before जानासि. A. गभीरं निनदद्भिः & D. गभीरध्वनिभिः. A. D. om. खलु. A. D. E. गम्भीर after किमपि. A. गम्भीरतरम् & B. गम्भीरान्तरम्. C. D. E. F. om. एव. D. गम्भीरध्वनितम् & सकलगुणानाम्. A. B. om. अपि. B. भागधेयभाजनम्. A. D. G. om. भागधेयस्य. D. has not भाजनं भूत्वापि कथमेकस्य भागधेयस्य. C. E. F. न भाजनम्.

64. D. संसईअदि. A. ईरिसो.

65. A. D. repeat शान्तं पापम्. A. °क्रोधप्रसभभययोः C. D. E. F. घोरमस्तः.

नरेन्द्रः कैकेयीवचनपरिपाटीविगलितः
क्षणं मोहक्रोधप्रसरभरयोरन्तरचरः ।
सुतं चोरग्रस्तो मणिमिव करस्थं न कृपण-
स्तृणानीव प्राणान्पुनरयममुञ्चद्दशरथः ॥ १७ ॥

66 यमुना । अवि णाम भरदस्स णाणुमदमिदम् ।

67 सरयूः । अयि भरतस्य मातुलगृहादागतस्य कैकेय्याश्च संवाद एवोत्तरं दास्यति ।

68 गङ्गा । कीदृशः पुनरसौ ।

69 सरयूः ।

मातस्तातः क्व यातः सुरपतिभवनं हा कुतः पुत्रशोका-
त्कोऽसौ पुत्रश्चतुर्णां त्वमवरजतया यस्य जातः किमस्य ।
प्राप्तोऽसौ काननान्तं किमिति नृपगिरा किं तथासौ बभाषे
मद्वाग्बद्धः फलं ते किमिह तव धराधीशता हा हतोऽस्मि ॥ १८ ॥

70 गङ्गा । सहर्षम् । वत्स भरत भवसि रामानुजन्मा ।

71 सरयूः ।

रामे प्राप्ते वनान्ते कथमपि भरतश्चेतनां प्राप्य तातं
नीत्वा देवेन्द्रलोकं मुनिजनवचनादूर्ध्वदेहक्रियाभिः ।

---

66 अपि नाम भरतस्य नानुमतमिदम् ।

---

66. A. B. इदं णाणुमदम्.

67. All except A. B. अये. A. B. मातुलगृहादागतस्य भरतस्य.

68. A. अयम्.

69. B. F. °पतिभुवनम्. C. D. E. F. कथम् for कुतः. A. D. जातम्. A. F. वाग्बन्धः.

70. B. ततः किम् after नुजन्मा.

71. C. D. E. F. om. सरयूः ।

रामे ... वीरः. A. वनान्तम्. B. वासतोऽभ्येत्य for श्चेतनां प्राप्य. B. °क्रियान्ते. A. स्वजनवृततनुः. B

भ्रातुः शोकाभितप्तः स्वजनपरिवृत्तः पालयामास नन्दि-
ग्रामे तिष्ठन्नयोध्यां रघुपतिपुनरागामिभोगाय वीरः ॥ १९ ॥

72 यमुना । तदो तदो ।

73 सरयूः । अहमेतावदेव जानामि । ततः परं तद्वृत्तान्तानिरूपणाय निजजलकमलवनवासी कोऽपि कलहंसः प्रस्थापितो मया ।

74 प्रविश्य । कलहंसः । देव्य इदं नमो वः ।

75 तिस्रः । अयि कमलावतंस कलहंस मङ्गलमन्दिरं भव ।

76 गङ्गा । अये कथय तावद्वत्सानां मे प्रथमतःप्रभृति पथि चरितानि ।

77 हंसः ।

विघ्नानिवानुसरतो विनिवार्य पौरा-
नग्रे स्वयं नय इवैष जगाम रामः ।
एनं विभूतिरिव सानुजगाम सीता
तां लक्ष्मणस्तु सुखलाभ इवान्वगच्छत् ॥ २० ॥

78 गङ्गा । ततस्ततः ।

79 हंसः । ततः कियत्यपि दूरे पथिकलोकेनेदमुक्तस्ते वत्सवर्गः ।

पन्थाः समः सिकतिलो मृदुशाद्वला भू-
र्वेतस्वती सरिदियं शिशिरा न दूरे ।

---

72 ततस्ततः ।

नन्दिग्रामम्. A. °योगाय & G. °भोगाप (?)

73. A. एतत्. A. B. परन्तु. A. om. तत्. C. D. E. F. om. जल.

74. D. F. om. कल in कलहंसः.

75. C. D. E. F. om. कलहंस. after which A. adds विजयी भूत्वा.

76. B. अयि. C. E. F. om. मे. B. om. पथि. A. चरितम्.

77. A. एव for एष & एवम् for एनम्. D. च for सा. A. B. G. अनुगच्छत्.

79. D. om. ततः. A. D. पथि.° A. एवम् for इदम्. C. E. मृदुशतिला.

अग्रे चकास्ति सरसी च कुमुद्वतीयं
कादम्बकूजितकरम्बितहंसनादा ॥ २१ ॥

अन्यच्च ।

तरुरयमितः शीतच्छायः स्रवन्मधुशीकरैः
सरिदियमितः स्वल्पस्वच्छप्रवाहमनोरमा ।
इदमिदमितः स्निग्धामोदं मुहुर्मधुरध्वन-
न्मधुकरवधूमुग्धाभोगं वनं सरसीरुहाम् ॥ २२ ॥

80 गङ्गा। अहो अध्वश्रमशमनानि पथिकजनवचनानि ।

81 यमुना। तदो तदो ।

82 हंसः। ततः प्रियतममनुगच्छन्ती जानकी ।

भीतं विलोक्य हरिणं करुणार्द्रचित्ता
पत्युर्निजेन पिदधे धनुरंशुकेन ।
केदारसीम्नि सदयं च यवप्ररोह-
मादाय साधु विदधे श्रवणावतंसम् ॥ २३ ॥

अन्यच्च ।

तटभुवि सरसीनां सैकते निम्नगानां
परिसरमपहातुं चक्रवाकी प्रियस्य ।

---

81 ततस्ततः ।

A. वेतस्विनी. A. B. हंसमाला & G. हंसनादाः. A. om. अन्यच्च. & has स्वच्छस्वल्प° A. B. मनोहरा. A. स्निग्धं मोदम्. D. F. मधुरम्.

80. C. F. om. अहो. D. °शामितानि. B. adds पथि before पथिक.° C, E, F. om. जन.

82. B. प्रियं रामम्, & C.D. E. F. प्रियतमानुपदम् in place of प्रियतमम्. D. om. अनु. A. B. कलम & C. E. यवस for च यव.° B. सापि. A. B. अपिच. A. D. उपहातुम्. A. G. चक्रवाकी & समर्था. A. शुभम् for शुचम्.

क्षणमपि न समर्था लोलमालोकयन्ती
पथि जनकतनूजा प्राप हर्षं शुचं च ॥ २४ ॥

83 गङ्गा । एवमनुकम्पनीयवत्सला मे जानकी । पुनः सस्नेहम् । अपि तावत्पथि नीतिशीतलानि मे वत्सानां शीलानि ।

84 हंसः । कीदृशी पुनः पथिकनीतिः ।

85 गङ्गा ।

यावत्कर्णं तपति तपनस्तावदेव प्रयाणं
विश्रामश्च प्रसरति रवेरंशुजाले कराले ।
यात्रोद्योगः पुनरपि रवेर्लम्बमाने विमाने
यावन्मीलत्यथ कमलिनी तावदावासबन्धः ॥ २५ ॥

86 हंसः । भगवत्यनवस्थितमिदं नित्यपथिकानाम् ।

87 गङ्गा । हन्त कथं कठोरातपस्पर्शमपि जानन्ति जानकीललिताङ्गानि ।

88 हंसः । अलं कातरतया ।

अपि तपति पतङ्गे चण्डचण्डैर्मयूखैः
पथि जनकतनूजा नैव सन्तापमाप ।

89 गङ्गा । सकौतुकम् । कथमिव ।

---

83. D. अनुकम्प्या वत्सजानकी. B. F. अनुकम्पनीये. A. वत्सा for वत्सला after which C. E. वत्सा. A. B. om. मे. A. D. अयि.

85. A. om. विमाने. A. & B. om. मे. D. om. मे...शीलानि. & reads यावन्नामीलति for यावन्मीलति. B. D. अपि for अथ.

86. D. om. भगवति. F. भवति.

87. F. om. कथम्. A. B. D. कठोरताप (B. °स्य) स्पर्शम्. A. जनयन्ति for जानन्ति.

88. A. अयि for अपि, & चण्डचण्डैः.

90 हंसः ।

अपरिचितनिमेषालोकमालोकयन्ती
कुवलयदलदामश्याममङ्कं प्रियस्य ॥ २६ ॥

91 गङ्गा । प्रियतमस्नेहशीतया सीतया न केवलमात्मा वयमपि जीविताः ।

92 सरयूः । पालिताश्च ।

93 हंसः ।

अत्युच्चण्डैस्तपनकिरणैस्तापितायां पृथिव्या-
मप्यन्येषां कठिनवपुषां दुर्गमे मार्गसीम्नि ।
प्रेमार्द्रेण प्रगुणितधृतिश्चेतसा शीतशीता-
न्मेने सीता प्रियतमपदैरङ्कितान्भूमिभागान् ॥ २७ ॥

94 यमुना । अये ताद दिणअर कहं णिअकुडुम्बए वि णिक्करुणोऽसि संवुत्तो ।

95 सरयूः । अयि देवि वसुधे कथं निजसुतायामप्येवं निर्दयासि संवृत्ता ।

96 गङ्गा । विहस्य । अलमनयोरुपालम्भनेन । न खलु स्नेहानुगुणवृत्तयो महाभूतप्रवृत्तयः ।

---

94 अये तात दिनकर कथं निजकुटुम्बकेऽपि निष्करुणोऽसि संवृत्तः ।

---

90. D. om. हंसः. A. D. श्यामलाङ्गम्.
91. A. शीतलायाः सीतायाः. B. D. G. शीतलया. A. जीविताः स्मः.
92. D. om. सरयूः.
93. A. B. D. G. अपि for अति.
94. A. B. G. अयि. A. B. D. om. कहम्. F. G. कुडुम्बे. B. om. वि.
95. B. D. G. सीतायाम् after अपि. C. E. F. om. एवम्. D. om. असि संवृत्ता.
